मेघदूतम्

(जगद्गुरीय-रसदीपिनी-व्याख्योपेतम्)

कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा

मेघदूतम्

(जगद्धरीय-रसदीपिनी-व्याख्योपेतम्)

सम्पादकः

प० श्री हृषीकेश झा

कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालयः, दरभङ्गा

कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय

दरभंगा

१९८२

प्रथमावृत्तिः १९८२ (१००० प्रतयः)
मूल्यम् : द्वादशरूप्यकम्

प्रकाशकः
कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालयः
दरभंगा (बिहार)

मुद्रकः
तारा प्रिंटिंग वर्क्स
वाराणसी

आमुखम्

अथेदं प्रकाश्यते सुलभग्रन्थमालायाः षष्ठपुष्परूपमेघदूताख्यं खण्डकाव्यम् ।

इदं हि :—

आलङ्कारिकचूडामणिना श्रीजगद्धराख्येन ।
विरचितया हि विवृत्या विभूषितं मेघदूताख्यम् ॥

× × × ×

काव्यमखण्डरसालम् खण्डं काव्यं सुधीर्हृषीकेशः ।
सम्पादितवाञ्छ्रमतः पुरो बुधानां रसोल्लसन्मनसाम् ॥

× × × ×

पण्डितवरेण श्रीहृषीकेशेन सम्पादितस्यास्य मेघदूतस्य प्रकाशनमिदं प्रकल्पतां जगन्मङ्गलाय गीर्वाणवाणीरसिकजनमानसपरितोषाय सर्वजनसुखाय परमानन्दाय चेत्याशास्ते ।

विदुषां वशंवदः
जयमन्त मिश्रः
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य

भूमिका

जयतु जयतु देवः कोऽपि कात्यायनेय
विबुधविततिवन्धः सर्वविद्याधिदेवः ।
जयतु जयतु वाणी शाश्वती नैर्जरीयं,
जयतु जयतु देवः श्रीनिवासः पुराणः ॥
षड्भिरंगैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥

सुविदितिमेव सुरभारतीसमुपासकानां कविकुलगुरोः कालिदासस्य साहित्यजगति वैलक्षण्यं वैचक्षण्यं च शास्त्रान्तरेषु । महाकवेरस्य सर्वतोमुखीं प्रतिभां, विलक्षणां कल्पनाशक्तिम्, उत्कृष्टंनाटकनिर्माणकौशलं च समालोच्यैव प्राच्याः पाश्चात्त्याश्च महाकवयः समालोचकाश्चामुं कविकुलगुरुत्वेन कविशिरोमणित्वेन वाग्देवतावतारत्वेनानुस्मरन्ति नमन्ति च ।

महाकवेरस्य जन्मस्थानजीवनकालादिविषयेऽद्यापि अज्ञानतमश्छन्ना वयं किं वदन्तीरेवाश्रयाम इति महतो विषादस्य स्थानम् । तथाप्यस्य ग्रन्थानां समालोचनात्. अन्तरंगप्रमाणानां संबलेन प्रतीमो यदयं महाकविः जात्या ब्राह्मणः, शिवभक्तोऽपि पञ्चदेवोपासकः वर्णाश्रमधर्मे बद्धादरश्चासीत् । साङ्गैः वेदैः सह उपनिषदां दर्शनानां स्मृतिपुराणादीनां प्रौढज्ञानवानयमायुर्वेदकामशास्त्रनृत्यसंगीतमृगयाचित्रकलादिशास्त्रान्तरेष्वपि प्रमाणभूत आचार्य आसीदिति । कश्मीरोद्भूतकेसरहिमवदुपत्यकोद्भूतदेवदारुवृक्षादिवर्णनात्कलिंगदेशवर्णनक्रमे नारिकेलवृक्षवर्णनात्, ताम्रपर्ण्याः शुक्त्यादीनां समुद्रस्य च सम्यक् वर्णनदर्शनात्, किं बहुना समग्रदेशस्यैव सूक्ष्मवर्णनदर्शनात्समग्रदेशपरिचितत्वं राष्ट्रकवित्वं चास्य महाकवेः स्पष्टमेव ।

महाकवेरस्य उपलभ्यमानासु कृतिषु प्राच्यैः पाश्चात्त्यैश्च विपश्चिदपश्चिमैः यः क्रमो निरधारि तदेवं वर्त्तते :—१ ऋतुसंहारम्, २. मालविकाग्निमित्रम्, ३. कुमारसंभवम्, ४. विक्रमोर्वशीयम्, ५. मेघदूतम्, ६. रघुवंशम्, ७. शाकुन्तलम् ।

एतेन कालिदासीयकाव्येषु मेघदूतस्य प्रौढिः स्पष्टैव । संस्कृतसाहित्यस्यगीतिकाव्येषु सर्वश्रेष्ठत्वेन परिगण्यमानमिदं खण्डकाव्यं कविताकामिन्या विलासभूतस्य कविकुलगुरोः कालिदासस्य कलाप्रौढिं कल्पनाशक्तेः प्रागल्भ्यं, माधुर्यमयीं परिष्कृतां भाषां, विषयवस्तुनो धारावाहिनीं गतिं च सुष्पष्टं व्यञ्जयति । खण्डकाव्यमिदं विषयानुकूलं मन्दाक्रान्ता वृत्ते न्यबन्धि यत्र कुवेराभिशप्तस्य प्रियावियुक्तयक्षस्य वेदनामय्यां कथायां विप्रलम्भस्य करुणप्रवाहो वरीवर्ति । एतदनुकृत्या अन्यान्यपि

दूतकाव्यानि पश्चात्तनैर्बहुभिर्महाकविभिर्न्यबन्धिषत, किन्तु न केनापि मेघदूतनिष्ठा प्रतिष्ठा लेशमात्रमप्यासादि ।

अत्र स्वल्पेष्वेव शब्देषु मेघदूतस्य कथावस्तु प्रस्तूयते—

कश्चिद् यक्षः कुवेरशापवशात् प्रियावियुक्तः सन् संवत्सरं यावत् अलकाया निष्कासितो रामगिरौ स्थितः सन् एकदा आषाढस्य प्रथमदिवसे (प्रशमदिवसे वा) आश्लिष्टगिरिसानुं मेघमद्राक्षीत् । प्रियाविरहितो यक्षस्तथाभूतं मेघमवलोक्य पूर्वं कुटजकुसुमैस्तस्य स्वागतं विधाय मार्गदर्शनपूर्वकं संदेशवचनं वक्तुमुपचक्रमे । अस्मिन् क्रमे प्रकृतिवर्णनातिरिक्तं भौगोलिकविवेचनमप्यनुसंधेयमेव । पूर्वमेघे कालिदासस्य उज्जयिनीं प्रति विशेषाग्रहो दृश्यते । प्रस्थानात्पूर्वं मार्गदर्शनक्रमे यक्षस्तं मालदेशम्, आम्रकूटपर्वतम्, विन्ध्यपादे विशीर्णां रेवाम्, परिणतफलश्यामजम्बूवनान्तान्, दशार्णान्, दशार्णराजधानीं विदिशाम्, उज्जयिनीम्, गम्भीराम्, तीर्थं देवगिरिम्, चर्मण्वतीमुत्तीर्य दशपुरम्, कुरुक्षेत्रं, कनखलं, हिमाचलं, ततः क्रौञ्चरन्ध्रमार्गेण कैलासं कैलासादलकां यावत् तत्तत्स्थलीयवर्णनपुरःसरं प्रापयत् (मार्गमदर्शयत्) । अनन्तरं च अलकापुरीं वैशद्येन वर्णयन् स्वकीयागारं निरदेशयत् । तत्र स्वकान्तां प्रति संदेष्टव्यमुपदिश्य चैवमचीकमत—

"मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः ।"

कथाया उद्गमः

यद्यपि मेघदूतकाव्ये कवेः स्वकौशलमेव प्रधानमस्ति तथापि कस्यचिच्चित्रस्य कृते भित्तेः फलकस्य वा यन्महत्त्वं भवति तन्महत्त्वमुपाख्यानमेकं ब्रह्मवैवर्त्तपुराणे एवं वर्त्तते—

"अलकाधिपतिर्नाम्ना कुवेरः शिवपूजकः ।
तस्यासीत्पुष्पवटुको हेममालीति नामतः ॥
तस्य पत्नी सुरूपा च विशालाक्षीति नामतः ।
स तस्यां स्नेहसंयुक्तः कामपाशवशं गतः ॥
मानसात्पुष्पनिचयमानीय स्वगृहे स्थितः ।
पत्नीप्रेमसमायुक्तो न कुवेरालयं गतः ॥
कुवेरो देवसदने करोति शिवपूजनम् ।
मध्याह्नसमये राजन् पुष्पाणि न समीक्षते ॥
हेममाली स्वभवने रमते कान्तया सह ।
यक्षराट् प्रत्युवाचाथ कालातिक्रमकोपितः ॥
कस्मान्नायाति भो यक्षा हेममाली दुरात्मवान् ।
निश्चयः क्रियतामस्य प्रत्युवाच पुनः पुनः ॥

यक्षा उचुः

वनिता कामुको गेहे रमते स्वेच्छया नृप ।
तेषां वाक्यं समाकर्ण्य कुवेरः कोपपूरितः ॥
आह्वयामास तं तूर्णं बटुकं हेममालिनम् ।
ज्ञात्वा कालात्ययं सोऽपि भयव्याकुललोचनः ॥
आजगाम नमस्कृत्य कुवेरस्याग्रतः स्थितः ।
तं दृष्ट्वा धनदः क्रुद्धः कोपसंरक्तलोचनः ॥
प्रत्युवाच रुषाविष्टः कोपाद्विस्फुरिताधरः ।

धनद उवाच

रे पाप दुष्ट दुर्वृत्त कृतवान्देवहेलनम् ॥
अतो भव श्वित्रयुक्तो वियुक्तः कान्तया सदा ।
अस्मात्स्थानादपध्वस्तो गच्छ स्थानमथाधमम् ॥[1]"

वस्तुतो जगद्धरी व्याख्याया उपोद्घातेऽप्याधारत्वेनेदमेवोपाख्यानमादत्तमिति तदंशाधुशीलनात्प्रतीमः ।

पाठभेदः

कालीदासीयग्रन्थेषु शाकुन्तलमेघदूतयोर्यावन्तः पाठभेदा वर्त्तन्ते न तावन्तो अन्येषु ग्रन्थेषु । कदाचित्स्वाभीप्सितार्थयोजनार्थमपि व्याख्यातारोऽधिकाधिकं पाठान्तरं कल्पन्त इति नैषधीयचरितस्य प्रकाशव्याख्यानपरिशीलनादप्यनुमातुं प्रभवामः । वस्तुतः पाठान्तरबाहुल्यमपि कस्यचिद्ग्रन्थस्य प्रसिद्धिविषये प्रामाण्यमश्नुते । मेघदूतस्य पाठविषयेऽप्यालोचका अनुसंधातारश्च अद्यापि विवदन्त एव । एतदर्थमपि व्याख्यानस्यास्योपादेयत्वं महदिति स्थापयामः । अत्र प्राच्यपाठस्यादरे व्याख्यातुः पक्षपातो लक्ष्यते । व्याख्यानेऽस्मिन् ये पाठा व्याख्यायिषत तेषां सम्यगालोचनं तु एतदध्ययनादेव स्फुटं भवेत् । अनुसंधातॄणां कृते व्याख्यानान्तरैः सह समालोचनात्मकाध्ययनार्थमपि महानवकाशोऽत्र वर्त्तते । एषु विशिष्टपाठेषु स्थालीपुलाकन्यायेन केषांचित्स्थलानां सूचनमात्रमत्र प्रस्तूयते—

यथा 'केतकाधानहेतोः (३), संख्यावलिपटहताम् (३६), स्तनपरिसरच्छिन्नसूत्रैश्च हारैः (६९),

१. एतदनन्तरं कथायाः प्रवाहोऽन्यथा दृश्यते । अंशोऽयमेकादशीव्रतमाहात्म्ये संगृहीतादाषाढकृष्णैकादशी (योगिन्येकादशी) व्रतकथाया आदायि ।

अस्मदुपलब्धमातृकायां समग्रः श्लोको नास्ति। केवलं संकेतमात्रमेव वर्त्तते। यथा-'कश्चिदित्यादि' एवमादि। तथापि व्याख्यानमाधृत्य जगद्धरमतानुकूलाः पाठा अत्रोदाहरिषत।

टीकावैशिष्ट्यम्

सत्स्वप्यनेकेषु पाठभेदेषु प्राच्यसम्मतपाठस्य निदर्शनार्थं जगद्धरी रसदीपिनीयं प्रमाणभूतेति वयं निश्चिन्मः। यद्यप्यत्र तत्तत्स्थलेषु पाठान्तराण्यपि सम्यग्व्याख्यायिषत तथापि इष्टपाठव्याख्याने यत्कौशलमत्र दृश्यते तदन्यत्र सुदुर्लभमेव। एतेन अनितर-साधारणं वैशिष्ट्यमप्यत्र बहुषु स्थलेषु लभ्येत। यथा 'केतकाधानहेतोः' इति पाठं मन्वानेन व्याख्यात्राऽनेन—'के जले अतको भ्रमणशीलः मत्स्यस्तस्य गर्भाधानहेतोः' इति व्याख्यानमनन्यसाधारणमेव। प्रशस्तानामपि पदानां विशिष्टव्याख्यानदर्शनादस्या उपादेयत्वं स्वतः सिद्धं भवति।

एवमेव—'आशाबन्धः कुसुमसदृशं प्रायशोह्यङ्गनानां-
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि॥

इत्यस्याधस्तनं विशिष्टं व्याख्यानमनुशीलनीयं भवति—

"पुष्पमपि वेः पक्षिणः प्रयोगे पतने सति सद्यः पात्याशाबन्धेन मर्कटजालेन रुध्यते। यद्वा पुष्पमपि विप्रयोगे वृन्ताद्भ्रंशे सद्यः पतदाशाबन्धेन रुध्यत इत्युक्ति-श्लेषः।'''''''''आशावन्धः समाश्वासे तथा मर्कटजालके' इति विश्वः" इति।

एवमेव प्रथमश्लोकव्याख्यानक्रमे यक्षशब्दस्य विशिष्टव्युत्पत्तिप्रदर्शनमपि व्याख्यातु-र्व्याख्यानकौशलं सम्यक् प्रदर्शयति इत्यत्रानुसंधेयम्। व्याख्यासुधाकारेण च यक्ष शब्द एवं व्युदपादि—

"यक्ष्यते पूज्यते 'यक्ष पूजायाम्' 'अकर्त्तरि च कारके संज्ञायाम्' इति कर्मणि घञ्। इः कामः तस्येवाक्षिणी अस्येति वा, इरक्षिषु यस्येति वा। 'बहुव्रीहौ सक्थ्यक्ष्णोः' इति षच्'। इति।

एवमेवान्यत्रापि विशिष्टविषया अनुसंधेयाः।

काव्यशास्त्रिषु भरतस्य मतानुशीलने जगद्धरस्य महती श्रद्धा दृश्यते। यदर्थमारम्भेऽप्येवं प्रत्यज्ञायि—

"छन्दोलङ्करणं कोषान् भरतं पाणिनेर्मतम्।
विभाव्य क्रियते टीका श्रीजगद्धरसूरिणा॥"

एतदनुकूलमेव भरतं प्रति आदरोऽपि प्रादर्शि। यथास्थलं यथाप्रयोजनं चाऽन्येषां दण्डिप्रभृतीनामाचार्याणामुद्धरणान्यपि दृश्यन्ते। प्रामाण्यप्रदर्शनार्थं ये कोषकारादयोऽत्रोदाहरिषत तेषु विश्वामरधरणिमेदिनिकरादयः प्रामुख्यं भजन्ते। स्मृतिर्वैद्यकनीत्या-

गमप्रभृतिशास्त्रान्तराणि भट्टिरघुवंशप्रभृतीनां काव्यान्तराणामपि अत्र प्रामाण्योदाहरणं व्याख्यातुः कौशलं व्याख्यानरीतिं च सुस्पष्टं व्यञ्जयति।

जगद्धरस्य देशकालौ

संस्कृतसाहित्यजगति जगद्धरकर्त्तृका अनेकाः कृतयः समुपलभ्यन्ते। किन्तु विपश्चितो निरणैषुर्यत् गीर्वाणवाण्याः सेवायां समर्पितजीवितास्त्रयो जगद्धरा अभूवन्। तेष्वन्यतमेन स्तुतिकुसुमाञ्जलि नामा अतीव प्रौढपाण्डित्यपूर्णः स्तुतिग्रन्थो न्यबन्धि। स्तुतिकुसुमाञ्जलेः कर्त्ता जगद्धरः कविताकामिनीकेसरेतिककारत्रयोद्भवप्रथितं कश्मीरदेशं स्वजन्मनाऽलञ्चकारेति स्तुतिकुसुमाञ्जलिग्रन्थे स्पष्टमेव। अनेनैव जगद्धर-भट्टेन यजुर्वेदे 'वेद-विलास' नामधेयं भाष्यं न्यबन्धीति भट्टमहोदयेनैवमाख्यायि—

"अनन्तसिद्धान्तपथान्तगामिनः समस्तशास्त्रार्णवपारदृश्वनः।
ऋजुर्यजुर्वेदपदार्थवर्णना व्यनक्ति यस्याद्भुतविश्रुतं श्रुतम्॥"

अस्यापि पितुर्नाम रत्नधर एवासीदित्यस्ति भ्रान्तेरपरोऽवकाशः। यथा स्ववंशवर्णनक्रमे स्वपितुर्वर्णनप्रसंगे स्तुतिकुसुमाञ्जलिकार एवमाह—

"सुतोऽभवद् रत्नधरः शिरोमणि-
र्मनीषिणामस्य गुणौघसागरः।
यमाश्रिताह्लास्त सरस्वती हरे-
रुरःस्थलं रत्नधरं श्रितां श्रियम्॥

× × × ×

अथास्य धीमानुदपादि वादिनां-
वितीर्णमुद्रो वदनेष्वनेकशः।
उदारसंस्कारसुसारभारती-
पवित्र वक्त्राम्बुरुहो जगद्धरः॥"

जीवनकालश्चास्य १३५० खृ० समीप इति विपश्चितो निश्चिन्वन्ति[१]।

द्वितीयस्य विषये मौनमेवावलम्बामहे वयम्, प्रामाणाभावात्, प्रकृते उपयोगा-दर्शनाच्च। संप्रत्यत्र प्रस्तुतव्याख्यानलेखकं जगद्धरमधिकृत्य किञ्चिन्निवेदयामहे—

पाराशरगोत्रोद्भवोऽयं जगद्धरो मिथिलायाः पञ्जीव्यवस्थानुसारं सुरगणमूलको-ब्राह्मण आसीत्। खृष्टीयपञ्चदशशतकस्योत्तरार्द्धे मिथिलेशधीरसिंहस्य धर्माधि-कारित्वमावहतानेन मालतीमाधवमेघदूतवासवदत्तावेणीसंहारगीतगोविन्दप्रभृतिषु काव्येषु व्याख्या व्यरचिषतेति श्रूयते[२]। स्व० कविशेखरबदरीनाथझामहाभागेन परिचयस्यास्यावसाने वेणीसंहारटीकोट्टंकितजगद्धरपरिचयपरकः श्लोकोऽयमुद्धृतः—

---

१. स्तुतिकुसुमाञ्जलेः भूमिकायां श्रीमन्तः प्रेमवल्लभत्रिपाठिमहाभागाः।

२. मिथिला के संस्कृत सा० महारथियों की तालिका—मिथिलाङ्क पृ० ५४

"येनापाठि कठोरगौतममतं वैशेषिकं खण्डनं,
येनाश्रावि सकाव्यकोषनिवहं तत्पाणिनीयं श्रुतम् ।
छन्दोऽलङ्करणं च शुद्धभरतं येनाध्यगायि स्थिरं-
तेनानेन जगद्धरेण कविना टीका कृता मर्मदा" ॥

एतेनापि मेघदूतस्यापि व्याख्याता अयमेव जगद्धर इति सिध्यति, यतो मेघदूतस्य प्रस्तुतव्याख्याया अप्यवसाने किञ्चिद्व्यत्यासेन अयमेव श्लोको वर्त्तते । स्व० कविशेखर-महाभागेनास्य 'जगद्धर ठाकुर' इति ठक्कुरोपाह्वं नामोदाहृतमिति चिन्त्यम्, संप्रति सुरगणमूलकानां मैथिलानां झोपाह्वत्वदर्शनात् । अतो 'जगद्धर झा' इति व्याख्यातुर्नाम इति वयं स्थापयामः प्रतिबन्धकप्रमाणोपलब्धिं यावत् । परिचयश्चास्य जगद्धरस्यैवं वर्त्तते—

मिथिलेशधीरसिंहस्य धर्माधिकारित्वं तूक्तपूर्वमेव धीरसिंहश्चायं खण्डवला-कुलोद्भूत एवासीदिति न प्रमदितव्यम् । वस्वब्धिवाहुशशि (१२४८) सम्मितशाकवर्षे मिथिलायां नान्यवंशस्य राज्यावसानमभूत् । तदनन्तरं १३४४ ई० वर्षे हरिसिंहदेवस्य राजपण्डितः कामेश्वर झा राज्यमिदं स्वायत्तीकृत्य १३४५ ई० वर्षे स्वपुत्राय भोगेश्वर झा शर्म्मणे प्रददौ । अयमेव भोगेश्वरो भवसिंह नाम्ना राज्यमकार्षीत् । अस्मिन्नेव वंशे धीरनारायणो नाम राजाऽभूत्, यस्य सभायां धर्माधिकारिपदे अयं जगद्धर आसीदिति प्रामाणिका आहुः । धीरनारायणस्य च समयोऽधस्तनात्सूचीपट्टादवगन्तुं [1]शक्यते—

१. कामेश्वर झा (१३४४)	७. म० रा० विश्वास देवी
२. भव सिंहः	८. दर्पनारायणः
३. देव सिंहः	९. धीरनारायणः
४. शिव सिंहः	११. हरिनारायणः (भैरव सिंहः)
५. महाराज्ञी लखिमा देवी	११. रूपनारायणः (रामभद्रः)
६. पद्म सिंहः	१२. कंसनारायणः (लक्ष्मीनाथः) (१५४८)

एवं जगद्धरस्याश्रयदातुः धीरनारायणस्य समयः पञ्चदशशतकस्य उत्तरार्द्धमिति सिध्यति । अतो जगद्धरस्यापि निश्चितः कार्यकालः खृष्टीयपञ्चदशशतकस्योत्तरार्ध इति स्थापयामः ।

मातृका

अस्मदुपलब्धा रसदीपिनी मातृका शुद्धप्राया पत्राकारा ५५ पृष्ठात्मिका वर्त्तते । प्रतिपृष्ठे १३ पंक्तयो वर्त्तन्ते । मातृकेयं ३८ तमपुटात् ३९ तमपुटं यावत् रिक्ता वर्त्तते, यत्र अष्टात्रिंशे पुटे अन्तिमोऽंश एवं वर्त्तते—

१. 'मिथिलाक राजवंश—मिथिलाङ्क पृ० ३१-३३ ।

"यद्वा परिसरन्ति परितो..........इति पचाद्यचि । स्तनात्परिसरैः परिभ्रष्टै-रित्यर्थः । यद्वा स्तनभ्रष्टैर्मुक्ताजालैः सूच्यते छिन्नगुणैर्हारैश्च । सूच्यते इत्यर्थः । क्वापि छिन्नसू"..........

ऊनचत्वारिंशे च पुटे रिक्तांशानन्तरं लेख एवं दृश्यते—
"रभूमौ मध्यदेशे च वेश्मनः' इति **विश्वः** । जलमुच इत्युचितम्,
जलेन चित्रदोषकरणात् । अत एव स्वस्मिन् तेषां तदाशंका । 'नायके'
प्रेरके नेते ति धरणिः । 'मातरिश्वा सदागति' रित्यमरः ॥७३॥

एतेनानुमिनुमो यदत्र अधस्तनानां चतुर्णां श्लोकानां व्याख्यानं मातृकालेखकेन नोपलब्धम् (यत्र आदिमान्तिमयोरंशतो लभ्यते)—

"गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः,
कलृप्तच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥६९॥

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं,
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥७०॥

पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः,
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रगण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥७१॥

नेत्रा नीताः सततगतिना मद्विमानाग्रभूमी-
रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।
शंकास्पृष्टा इव जलमुचस्त्वादृशा जालमार्गै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति" ॥७२॥

मातृकायामाहत्य श्लोकसंख्या ११४ उल्लिखिता वर्त्तते, किन्तु द्वे युग्मके अत्र सहैव व्याख्यायिषाताम् । मातृकायां युग्मकयोरुत्तरश्लोकयोः प्रतीकं नास्ति । यत्त्वत्र श्लोकसंख्या ११६ षोडशोत्तरशतात्मिका दृश्यते तद्युग्मकश्लोकद्वयान्तर्भूतयोरुत्तर श्लोकयोरपि पाठविधानादेव । यथा मातृकायां 'तन्वी श्यामा शिखरदशना' (   )

इत्यनेन सह 'तां जानीथाः परिमितकथाम्' इति, 'भर्त्तुर्मित्रं प्रियमविधवे' इत्यनेन सह 'इत्याख्याते पवनतनयं' इति च व्याख्यायि ।

कृतज्ञताज्ञापनम्

एतत्कार्यार्थं प्रथमप्रेरकतया प्रगतिविषये प्रतिदिनं जिज्ञासुतया च सर्वप्रथममत्र पण्डितवरेण्यानां श्रीमतामनन्तलाल ठाकुर महाभागानां नाम प्राथम्यमर्हति। सत्गुरूवत्सदैव सदाशयतया तत्परा एते कार्येऽस्मिन् यथा मामन्वग्रहीषुस्तत्कृते धन्यवादज्ञापनमत्र न संभवेत्, तदनुग्रहस्य शाब्दवर्णनानवच्छेद्यत्वात् । अतोऽनुसंधानसंपादनादिकर्मणि बद्धकंकणानामेतेषां पुरस्तात्सादरं प्रणामानेव निवेद्य मौनमवलम्बे। मातृकायां ये अंशा नष्टाक्षरा आसन् तेषु स्थलेषूहापोहाभ्यां समुचितनिर्देशप्रदानार्थं महान्तं श्रममङ्गीकृतवद्भ्यः प० आनन्द झा महाभागेभ्यो मे सादरं धन्यवादा नमोवाकाश्च ।

विश्वविद्यालयस्यास्याधिकारिषु कुलपतीन् डा० जयमन्त मिश्र महोदयान्प्रत्यन्यांश्च प्रति धन्यवादाः ।

अज्ञानध्वान्तविध्वंससत्रे सततदीक्षितान् ।
तारिताशेषशिष्यांस्तान्वन्देऽहं शिरसा गुरून् ॥

का० सिं० सं० विश्वविद्यालयः
कामेश्वरनगरम्
दरभंगा

हृषीकेश झा
संपादकः

कृष्णपतिकृता मेघदूतटीका

कुरुक्षेत्र विश्वविद्यालयात्कृष्णपतेः मेघदूतटीका १९७४ खृष्टाब्दे प्रकाशिता । कृष्णपतिरसौ खृष्टीय अष्टादशशतकस्यारम्भे मेघदूतं व्याख्यदिति तत्संस्करणसंपादकेन श्रीमता डा० गोपिकामोहनभट्टाचार्येण सुस्थापितम् । मैथिलपरंपरासम्मतपाठस्य निर्धारणार्थमनयोः व्याख्यानयोः सूक्ष्मानुशीलनमावश्यकम् । कृष्णपतिजगद्धरयोः एकदेशीयत्वात्पाठान्तरविषयेऽप्यनयोः स्वल्प एव भेदो लक्ष्यते । कुरुक्षेत्रसंस्करणे मूले केचन पाठाः संपादकवासनावशात्स्थानीयपाठादराग्रहाद्वापि अन्यथैव लक्ष्यन्ते । व्याख्यानक्रमे कृष्णपतिना ये पाठा व्याख्यायिषत तेषु जगद्धरविमताः पाठा अत्र प्रदर्शनार्थमुद्ध्रियन्ते—

श्लो० सं०	जगद्धरः	कृष्णपतिः
२२	अम्भोबिन्दुग्रहणचतुरान्	नास्ति
४६	ज्योतिर्लेखाबलयि	नास्ति
८७	देहलीत्यक्तपुष्पैः	देहलीदत्तपुष्पैः
८९	विरहमहतीम्	विरहजनितैः
९१	मयोन्मोचनीया	मयोद्वेष्टनीया
९३	स्निग्धाः सख्यः कथमपि	नास्ति
९६	मीनक्षोभाकुलकुवलय०	मीनक्षोभाच्चलकुवलय०
९९	विद्युद्गर्भः स्तिमित०	विद्युत्कम्पस्तिमित०
१०१	पवनतनयं	पवनतनये
१०२	श्लोकस्य तुरीये पादे एवमन्तरं दृश्यते—	

ज० पूर्वाशास्यं सुलभविपदां प्राणिनामेतदेव ।
कृ० भूतानां हि क्षयिषु करणेष्वाद्यमाश्वास्यमेतत् ।

मेघदूतम्

(जगद्धरीय रसदीपिनी व्याख्योपेतम्)

तद्भालानलशान्तये सुरधुनी तत्कालकूटोल्लस-
ज्ज्वालाजालविधूतयेऽमृतकरस्तत्कामशुद्ध्यै प्रिया ।
तत्सर्पोद्धतदर्पसर्पणविधौ यस्मिन् मयूराः स [दा
संसाराखिलश]ङ्कराय विभवे तस्मै नमः शम्भवे ॥

छन्दोऽलङ्करणं कोषान् भरतं पाणिनेर्मतम् ।
विभाव्य क्रियते टीका श्रीजगद्धरसूरिणा ॥

तत्कालिदासकवि[निर्मितखण्डकाव्ये- [मेघदूते]
व्याख्या] मयाल्पमतिनापि वितन्यते यत् ।
हासाय दुर्जनगणस्य भवेन्न चैत-
दुच्चैः पदं यदभिकाङ्क्षति सर्व एव ॥

इह तावदेवं किल [श्रू]यते यन्मानसे सरसि कनककमलकाननरक्षणाय धनाध्यक्षेण यक्ष एको नियुक्तः। स च कदाचिद् अतिविषमविषमवा[ण]वाणवेदनादूनमानसो निजमानिनीमानापनोदाय तं नियोगमवधूय भवनमाजगाम। तदानीमेवागत्य मुदितमदमेदुरमुखारविन्दैर्दिग्गजवृन्दैरिन्दीवरवृन्दमाकन्दमान्दोलितमित्यधिगत्यालकेश्वरो रोषकषायितनयनो भवता[1] मानवतीमानभा [रनिरसनाय] मम नियोगोऽवधीरित इति तयैव सममेकवत्सरं तव वियोगो भवत्विति तं शप्तवानिति। तामेतां प्रसिद्धिमनुरुध्य कालिदासमिश्रः खण्डकाव्यं कर्तुमुपक्रमते।

कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः,
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु-
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥१॥

---

१. भारवतीभारभा···मा.

कश्चिद् यक्षो गुह्यको **वसतिं चक्रे**। कोऽपि अनिर्दिष्टनामधेयो देवयोनिर्वासं कृतवानित्यर्थः। यद्वा **कश्चित्**-पदं खण्डकाव्यत्वसूचकम्। **खण्डकाव्यमुखं कुर्यात् कश्चिदित्यादिभिः पदै**रित्यभिधानात्। यद्वा महत्त्वप्रतिपादनाय सर्वनाम्ना कीर्तनम्। यद्वा कश्चित् कोऽपि यः स्वाधिकारप्रमत्तः स्वामिना शप्त इति कथावीज [तोऽनु-संधेयः]।····तदुक्तम्—**कथावीजं च [बद्धव्यं] कश्चिदित्यादिभिः पदै**रिति। **यक्ष** इत्यत्र इः [कामः तत्राक्षो] व्यवहारो [यस्येति व्युत्पत्तिः]। **इकार उच्यते काम इत्येकाक्षरकोषः। अक्षो [ज्ञानात्मशकटव्यवहारेषु**[1]] **पाशके** इति मेदिनीकरः। वास-स्थानमाह—**रामगिर्याश्रमेषु**। रामस्य दाशरथेर्गिरिर्माल्यवान् तस्याश्रमेषु स्थानेषु तपोवनेषु वा। अत्र बहुवचनेन विरहसंतापादेकत्र स्थित्यभावः सूचितः। युक्तं चै-तत् [भूयि]ष्ठं **दह्यमानोऽसौ** शीतलं **वस्तु सेवते**। शीतं **विरहसंतापा[द्] यत्र** [स्थानं] **विमुञ्चतीत्यभिधानात्**। रामगिरिवासेन सीताविरहिणा रामेणापि सीता लब्धा यथा तथा अहमपि प्रियामाप्स्यामीति तत्र उवास स इति। कीदृशेषु—**जनक-तनयायाः** सीतायाः **स्नानेन पुण्यं** पवित्र**मुदकं** जलं येषु। अनेन पवित्रजलपानादिना शापपापशान्तिः विरहानलतापोपशमश्च स्यादिति ध्वनितम्। यद्वा जनकतनयायाः स्नानेन स्नानीयेनाङ्गरागेणेति यावत्, पुण्यमुदकं येषु। अत्रात्रिमुनिपत्न्या अनुसूयया सीतायै पवित्रोऽविनाशी अंगरागो दत्त इति **पुराणवाणी। स्नानीयेऽभिषवे स्नानमिति विश्वः।** यद्वा जनकतनयास्नानायार्थाद्रामेण नक्राद्युत्सारणद्वारा पुण्यं निष्कलुषमुदकं येषु। अत एवात्र रामप[दोदा]हारेण सीतानिर्देशः। तथा स्निग्धाः सान्द्राश्छाया-प्रधाना तरवो [वृक्षाः ये]षु तेषु। एतेनापि विरहानलतापोपशम एव दर्शितः। छायातरुरित्यत्र **शाकपार्थिवादित्वा**न्मध्यपदलोपी समासः। यद्वा **मध्याह्नसंस्थिते** [सूर्ये तलच्छाया महीरुहाः। स्वस्थिता] **इव तिष्ठन्ति ते छायातरवो मताः**[2] इति परिभाषिताश्छायातरवः। केचित्तु पुण्योदकशालितया अतिगम्भीरच्छायातरुसमीपे चाश्रयस्य······द्वर्णता······तदुक्तम्—

सुशीतानि सुगंधीनि सरांसि च वनानि च।
संभोगेऽतिसुखं कुर्युरुद्वेगं विरहे भृशम्॥

इत्यूचिरे। तन्न विरहिणां विरहानलोपशमहेतोरेव [कविना] कांक्षितत्वादुद्वेगहेतु-परित्यागस्य च सर्वसम्मतत्वात्। तत उक्त एवाभिप्रायो ग्राह्यः। यक्षः कीदृशः—**स्वाधिकारे** कनककमलकाननपालनरूपे **प्रमत्तो**ऽनवहितः। अत एव **भर्तुः** कुवेरस्य शापेन **अस्तं** विनाशं **गमितः** प्रापितो **महिमा** माहात्म्यं दैवानुभावः स्वर्गादिगमनयोग्या

1. कोष्ठान्तर्गतो भागो मातृकायां नष्ट इति बोध्यम्।
2. अत्र मातृका शीर्णा वर्तते। शब्दकल्पद्रुमे—
   पूर्वाह्णे च पराह्णे च तलं यस्य न मुञ्चति।
   अत्यन्तशीतलच्छाया स छायातरुरुच्यते॥ इत्युद्धृतम्।

शक्तिर्यस्य सः। अस्तमिति मान्तमव्ययम्।····[स्वा] धिकारे प्रमादादनवहितोऽस्त-मितमहत्त्व एव भवतीति ध्वनिः। शापेन कीदृशेन कान्तिः सर्वांगसौंदर्यं तद्यस्यास्ति सा **कान्ता। अर्शआद्यच्**। तस्याः **विरहेण** विश्लेषेण **गुरुणा** महता दुःसहेन वा। कान्तेत्यनेन [[1]सर्वांग] रमणीयरमणीविरहेण तस्यात्यन्तमुद्वेगः सूचितः। यद्वा कान्ता-विरहस्य **गुरुणा** उपदेशकेन, ततः प्रभृति तस्य कान्ताविरहपरिज्ञानात् **गुरुर्महति**[2] **पित्रादौ दुःसहालघनोरपीति मेदिनीकरः**। तथा **वर्षभोग्येण** वर्षं व्याप्य भोग्येनानु-भवनीयेन। **कालाध्वनोरत्यन्तसंयोग** इति द्वितीया। तत्पुरुषसमासश्च। **कुमति चेति** णत्वम्। अत्र षण्णामपि ऋतूनां व्यतिकरमनुभावयितुं वर्षावधिः[3] शापः। अत एव **येन संवत्सरो दृष्टः सकृत्कालश्च सेवितः। तेन सर्वमिदं दृष्टं पुनरावर्तते जगदित्य**-भिधानम्। **वसतिः स्यादवस्थाने यामिन्याञ्च निकेतने** [इ] ति **विश्वः**। अत्र क्तिनि वच्यादिना संप्रसारणे कृते **शासिवसिघसीति** षत्वे च कृते उष्टीति स्यादिति न वाच्यम्, **असिवसोरति**रित्यौणादिकातिप्रत्यये वसतिपदस्य साधि[त]त्वात्। उक्त-दोषस्य च क्तिनि प्रवृत्तेः। **प्रमत्त** इत्यत्र **रदाभ्यां निष्ठातो नः पूर्वस्य च द** इति सूत्रेण न नत्वम्, **न ध्माख्याप्रीपूर्णमदामिति** निषेधात्। यद्यपि रामशैलाश्रमेष्वित्य-भिहिते विसंधिदोषो न भवति तथापि लोकप्रसिद्धिमनुरुध्यायं प्रयोगः। माल्यवतो हि रामगिरित्वेन प्रसिद्धत्वम्। तदन्यथाकरणे तु **रूढिच्युतकदोष** एव स्यात्। यणादेश-बहुत्वाभावेन च न विसंधिदोषः। **मञ्जर्यंसमगर्भांसावित्यादौ** बहु यणादेशाद्युपरि [4]दूषकत्वमकारीति।

अत्र सहृदयहृदयाह्लाद[कं] शब्दार्थयुगलं काव्यम्। तच्च दोषहानगुणो-पादानालंकारयोगरसावियोगैः सहितं विद्वज्जनमनोमोदं वितन्वते। तथाविधकाव्यकर्त्तुः कवेरपि कीर्तिः प्रीतिलाभश्च स्यात्। तथा च **सरस्वतीकण्ठाभरणम्**—

निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति॥

काव्यस्य च ललितोचितसन्निवेशचारुणो रसप्रधानतयैवसहृदयवृन्दानन्द[द] त्वम्। रसेषु च रसनीयतया शृंगारस्यैव प्राधान्यम्। शृंगारोऽपि संभोगविप्रलंभतया द्विविधः। संभोगोऽपि विप्रलम्भपूर्वक एव स्वदते। यथा कषायिते हि वस्त्रादौ [रागोऽ]नुषज्यते। तत्र च मंदाक्रान्ताच्छन्दसा विप्रलंभरसप्रधानमेघदूतनामकमिदं खण्डकाव्यम्। संघातलक्षणं चेदं काव्यम्। तदुक्तम्—यत्र कविरेकमर्थं सर्गेणैकेनैव वर्णयति काव्ये। संघातः [स विज्ञेयः········] यथा वृन्दावनमेघदूतादिः। कश्चित्तु कलापाख्यमिदं काव्यं

1. ····र्व्वीकाररमणीय इति मा०।
2. कोषे व्यत्यासो दृश्यते।
3. वर्षावायः इति मा०।
4. यणादेशरुपरिषत्वोर्दूषक····इति मा०।

समानवृत्तनिर्व्यूढकैशिकीवृत्तिसंश्रयः । कलापो……घटितः पर्यावन्धो विधीयते ॥ इत्यभिधानादित्याह । दशकामावस्थासु चात्र [प्रथमा [1]नयनप्रीति] लक्षणा प्रतिपादनीया । दशकामावस्थानन्तरं च विरहिणां चिरजीविता । तथा च भरतः—

पुनः पुनः प्रवर्त्तन्ते निवर्त्तन्ते पुनः पुनः ।
अवस्था हृदये यूनोस्ततश्च चिरजीविता ॥ इति ॥१॥

अथ यक्षस्य विरहवेदनामा [विदयितुं विरहिज] नोद्दीपकमुदिरमेदुरं वर्षर्त्तुमवतारयन्नाह—

तस्मिन्नद्रौ कतिचिदवलाविप्रयुक्तः स कामी-
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य [2]प्रथमदिवसे मेघमाश्लिष्टसानुं-
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥२॥

स यक्षस्तस्मिन्नद्रौ **मेघं ददर्श** । तत्र पर्वते जलदं पश्यति स्मेत्यर्थः । कदा आषाढस्य प्रथमदिवसे आद्यदिने । अत्र **मासानेतान् गमय चतुर** इति वक्ष्यति । इह आषाढप्रथम दिनमेवाहातो मासपञ्चतय [[3]जन्य] पूर्वापरविरोध इति नाशंकनीयम् । तत्र हि चतुरो मासानिति वर्षाकालोपलक्षिका लोकोक्तिच्छायालंकारः । कण्ठाभरणे तथैवोदाहरणम् । अत एव वर्षर्त्तूपलक्षकं कुटजकुसुमादिवर्णनम् । यद्वा प्रत्यासन्नश्रावणस्य गतापेक्षया **चतुरो मासानित्युक्तम्** । अत एव **प्रत्यासन्ने नभसीत्यत्र नभसि** श्रावण इति व्याख्यानं [युज्यते] । शापान्तः कीदृशः चतुरो मनोहरः, तत्तत्सुखलाभात् । यद्वा आषाढस्य अदिवसे विष्णुदिवसे शुक्लैकादश्यामिति यावत् । अत एव **'शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणावित्यादि** संगच्छते । **'अः केशवे निषेधे चेत्येकाक्षरः ।** मेघं कीदृशं **प्रेक्षणीयं** ख्यातम् [दर्शनीयमिति यावत्] । यद्वा आषाढादिनाश्विनं याव- **च्चतुरो मासान् गमय** । उत्थिते पुनर्विष्णौ मे शापान्त एव । तन्मासे च मयैवागन्तव्यमिति भावः । यथादिनचतुष्टया[4]नन्तरं पञ्चमदिने मयैवागन्तव्यमिति लोको [क्ति]-स्तथात्रापीति तत्त्वम् । क्वचित्तु **आषाढस्य प्रशमदिवस**[5] इति पाठः[6] । तत्राषाढस्य प्रशमदिनं श्रावणाद्यदिनम् । तेन मासानेतान् [गमय] चतुर इत्यनेनाविरोधः । किं कृत्वा ददर्श । **कतिचिदष्टसंख्यकान्मासान्नीत्वा** । स कीदृशः अवलायाः प्रियाया **विप्रयुक्तो**

---

१. कोष्ठान्तर्गतो भागः मातृकायां रिक्तो वर्तते ।
२. प्रशम…इति वल्लभ० ।
३. पद्यं इति मा० ।
४. दिनचतुष्टयसह सुपञ्चमदिने इति मा० ।
५. प्रशमदिन इति मा० ।
६. पाठे इति मा० ।

विरहितः । अत्र **कान्ताविरहगुरुणेत्युक्त्वा यदवलाविप्रयुक्त** इत्यभिधानं तत्पुनरुक्तमिति न वाच्यम्; अत्र स्त्रीमात्रवियोगे तात्पर्यात्, तत्र च कान्तिमत्स्त्रीविरहस्योक्तत्वात् । अत एव न पौनरुक्त्यम्, विशेषणे [तु नैव त] दित्यभिधानात्[1] । यद्वा यत एवावलाविप्रयुक्तो अत एव कान्ताविरहगुरुणेत्युक्तिपोष एवात्र अलंकारः ।

उक्तं [च]—**उक्तिपोषः क्वचिद्धेतोर्दूरभावेन योजनात् ।**
क्वचिदापेक्षलब्धस्य साक्षाच्छब्देन कीर्त्तनात् ॥ इति ।

यद्वा न बलं यस्याः सा[2] **अबला** । तथा च विरहानलसंतप्तया कान्तया वियुक्त इत्यर्थः । इति न पौनरुक्त्यम् । तथा **कामी** रागी **कनकवलयस्य** सुवर्णकंकणस्य **भ्रंशे**नाधःपातेन **रिक्तौ** तुच्छौ **प्रकोष्ठौ** बाहुमूले यस्य स तथा । अनेन विरहान [लाकु]-लता सूचिता । **प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेति मेदिनीकरः** । मेघं कीदृशम् । **आश्लिष्टसानुम्**, आलिंगितपर्वतैकदेशम् । अनेन मेघस्य स्थिरता दर्शिता । अन्यथा वाताहततया तस्य चपलता स्यादिति । आश्लिष्टपदेन मेघस्य शृंगा [रपरत्व] मपि विवक्षितम्[3] । आश्लिष्ट इति श्लिषेः कर्मणि क्तः । तथा वप्रे पर्वततटे क्रीडया **परिणतः । परिवृत्य कृताघातः परिणतो गज उच्यते** । तद्वत्प्रेक्षणीयं दृश्यं [निरवलम्बतया[4]] तिर्यगवलम्बितसार्थः श्याममच्छविरभिनवो मेघो गज इव शोभत इत्यर्थः । **वप्र……केदारे वप्रप्राकाररोधसोरिति** विश्वः । यद्वा वप्रक्रीडार्थं **परि** समन्तात् (कारेण १) **नतः** प्रह्वो यो गजः तद्वद्दर्शनीयमित्यर्थः । अत्रात्यन्तनम्रतया दन्तद्वयस्यादर्शनमावेदितमत एव घनसादृश्यम् । न च **कतिचिच्छब्दो** अल्पवचनः अल्पता च नेतव्यापेक्षया कालस्य न घटते, मासाष्टतयस्य नीतत्वात् मासचतुष्टयस्य नेतव्यत्वादिति वाच्यम्, यतो नेतव्यकालाल्पत्वेऽपि विरहदुःसहतया बहुत्वमुपचरितं नीतकालस्य बहोरप्यल्पत्वमिति[5] ।

तदुक्तम्—**प्रचुरेऽपि[6] गते काले कामिनामल्पवासना ।**
नेतव्येष्वल्पकालेषु घोरत्वाद्बहुवासना ॥ इति ।

कनकं हेम हाटकमित्यमरः । स्त्री योषिदबला योषेत्यमरः । स्थः प्रस्थः सानुरस्त्रियाम् इत्यमरः । वलयः कटके सानाविति विश्वः ॥२॥

---

१. 'दित्यभिधानं' इति मा० ।
२. 'यस्यास्त्यवला' इति मा० ।
३. 'रुचाक्षितं' इति मा० ।
४. 'निस्तामतया' इति मा० ।
५. प्यल्मत्व० इति मा० ।
६. 'प्रचुरो०' इति मा० ।

तस्य स्थित्वा कथमपि पुरः [1]केतकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः,
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥३॥

तस्य मेघस्य **पुरो** अग्रे **कथमपि** कामोद्दीपकतया कष्टेन **स्थित्वा राजराजस्य** कुवेरस्यानु**चरो** यक्ष**श्चिरं** बहुकालं **दध्यौ** चिन्तितवा [न्] [2]प्रियामित्यर्थः । यद्वा सोऽयमागतो घनसमयः तत्कथमनयावलया सदर्पकन्दर्पदर्पसर्पणवलाद्विह्वलया कुसुमसुकुमारहृदयया मदीयं विरहमनुस्मरन्त्या [[3]जीवि] तव्यमिति दुरुत्तरं व्यसनमापतितमिति चिन्तितवान् । यद्वा कथमहमिदानीं विरहवेदनाविह्वलहृदयो मदनोद्दीपिनि मुदिरोदये जीविष्यामीति चिन्तितवान् । यद्वा ध्यायतेरुत्कण्ठावचनत्वादकर्मकत्वम् । तेन **दध्यौ** उत्कण्ठितवानित्यर्थः । तस्य पुर इति **तसर्थप्रत्ययेनेति** षष्ठी । यद्वा **तस्य** मेघस्य **पुरो** अग्रे कथमपि **स्थित्वा** सोऽनुचर [स्त] स्य **राजराजस्य चिरं दध्यौ** कुवेरं सस्मार । आः कष्टं तादृशेनापि स्वामिना शापो दत्त इतीदृशेऽपि हर्षकाले मम दुःखमिति भावः । अत्र **राजराजस्येत्यधीगर्थदयेशां कर्मणीति** षष्ठी । यद्वा राजराजस्यानुचरः सः कथमपि स्थित्वा तस्य मेघस्य पुरो अलकायाः **केतकाधानहेतोः दध्यौ** । तं मेघमलकाकेतकाधानहेतुं सस्मार । अलकाकेतकाधानहेतुतया पूर्वं तस्यानुभवेन त [स्य] स्मरण [मित्य] र्थः । [अत्रा] **ध्यधीगर्थ** इति कर्मणि षष्ठी । यद्वा तस्य राजराजस्यानुचरस्तस्यैव पुरो अलकाया दध्यौ अलकां सस्मार । आः कष्टम् ! एतादृशि घनसमये यद्यलकायां स्थीयेत तदा स्वर्गायापि न स्पृ [हे] ति चिन्तितवानिति भावः । तस्य कीदृशस्य **केतकस्य** केतकीपुष्पस्य यदाधानं गर्भजन्म तस्य हेतोः कारणस्य । एतेन मेघस्य परोपकाररसिकता दर्शिता । **केतकमित्यत्र** विकारार्थे अनु[दात्ता] देरञ् । तस्य **पुष्पफलमूलेषु बहुलमिति** लुक् । **लुक्तद्धितलुकीति** स्त्रीप्रत्ययस्य निवृत्तिः । कीदृशो यक्षः **अन्तर**भ्यन्तरे **बाष्पो**ऽश्रुपूर्वावस्था यस्य स तथा । अतीव [स] हृदयतया न तस्याश्रु प्रवाहोऽभूत् । किन्तु स्तम्भिताश्रु गद्गदकण्ठनाल[4] एव सोऽभवदिति भावः । बाष्पश्चायमार्त्तिज एव । तदुक्तम्—

बाष्पो नामाश्रुणः पूर्वावस्था सा जायते त्रिधा ।
निमित्तत्रयसंसर्गादानन्देर्ष्यार्तिसंभवा[5] ॥इति ।

---

१. कौतुका० इति पाठा० ।
२. 'मित्यर्थात्' इति मा० ।
३. प्रपितव्य० इति मा० ।
४. 'स्तम्भिताश्रुगसदकण्ठेनाल' इति मा० ।
५. सम्भव इति, इति मा० ।

कथमेतादृशीं विकृतिं यक्षो जगामेत्यत आह—**मेघालोके**[1] घनोदये घनदर्शने[2] वा सति **सुखिनो**ऽपि सुरतसुखभागिनोऽपि जनस्य **कण्ठाश्लेषप्रणयिनि** कण्ठालिंगनप्रेमवति जने **अन्यथावृत्ति** [3]सुरतोत्सुकं चेतो भवति **किंपुनर्दूरसंस्थे** दूरदेशस्थिते कान्ताजने वाच्यम् । तत्रात्यर्थं विरहिणश्चित्तमुत्सुकं भवतीत्यर्थः । संपूर्वस्तिष्ठतिर्यद्यपि मरणे तथापि दूरस्थितो विरहिजनो मृत इवेत्याशयेनात्र तत्प्रयोगः । यद्वा **'मध्याह्नसंस्थितेऽप्यर्के'** इत्यादिप्रयोगदर्शनेन संस्थित शब्दोऽवस्थानार्थोऽपीति भावः । **आलोको दर्शनोद्योताावित्यमरः । प्रणयः प्रेम्णि विश्वासे याच्ञाप्रणययोरपीति विश्वः** । दूरे संतिष्ठत [4]इत्यर्थे **सुपि स्थः** इति कः । कश्चित्तु के जले अतको भ्रमर इति केतको मत्स्यस्तदाधानहेतोरित्यर्थः । वर्षाकाले मत्स्यानां गर्भाधानात् । अत्र योगविभागात् सप्तम्या अलुक् । [5]**अतक** इति अत सातत्यगमने औणादिकः कन् । **अतको भ्रामके खिसे** इति **धरणिः** इति व्याख्यातवान् ॥३॥

चिन्तानन्तरं यक्षव्यापारमाह—

प्रत्यासन्ने नभसि दयिताजीविताालम्बनार्थी-
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै-
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥४॥

नभसि श्रावणे प्रत्यासन्ने सति **स** यक्षः [**प्रीतः**] प्रीतियुक्तः सन् **तस्मै** मेघाय **प्रीतिप्रमुखवचनं** प्रेमप्रधानवचो यथा तथा **स्वागतं** सुखेनागतमिति **व्याजहार** ऊचे । महति प्राप्ते महतां प्रीत्या अभ्युत्थानमुचितमेवेति भावः । यद्वा **नभसि** आकाशे, मेघे प्रत्यासन्ने सतीत्यर्थः । कीदृशाय तत्का[लसमुद्भूतैर]भिनवैः **कुटजकुसुमैः** कृतार्घाय । किं कर्त्तुं **जीमूतेन** मेघेन द्वारा प्रवृत्तिं **हारयिष्यन्** वार्तां प्रियायै प्रापयितुम् । कीदृशीं-निजकुशलप्रधानां कान्ताजीवनस्थैर्य[प्रदायिनीम् । मद्विरहदूना] यदि सा न जीवति तदा शापान्तोऽपि मे निष्फलः स्यादिति निजकुशलबोधनं तज्जीव[6]तीति भावः । जीवं प्राणान् भवते बध्नातीति मूङ् बन्धने [**पृषोदरादि**त्वाज्जीमूतशब्दो निष्पाद्यते[7]] । वार्ताहारकत्वेन जीवनहेतुतया एव वचनात् । **नभाः श्रावणिकश्च सः इत्यमरः** ।

---

१. 'घनेदये' इति मा० ।
२. 'घनदर्शणे' इति मा० ।
३. 'सुरतोत्युकञ्चतो न' इति मा० ।
४. इतिऽर्थे इति मा० ।
५. अतत्रक' इति मा० ।
६. 'तज्जीवती'० मा० ।
७. 'साभिसंधिः' इति मा० ।

घनजीमूतमुदिरेति च। **हारयिष्यन्निति** हरतेर्लिट्। शेषे चेति लट्। **वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः**। **तस्मै** इति **क्रियाग्रहणमपि कर्त्तव्यमिति** संप्रदानता। **नभसि** श्रावणे इति पक्षे **मासानेतानिति** संगच्छत इति तत्त्वम् ॥४॥

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः,
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे,
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥५॥

गुह्य[**को** निधिर]क्षको यक्षो मेघं **तं ययाचे** प्रार्थितवान्। किं कुर्वन्, **औत्सुक्यात्** औत्कण्ठ्यात्[1] इत्यचिन्तयन्। किं तदत आह—धूमादीनां सन्निपातो मेलकरूपो मेघः क्व, संदेशार्थाः [संवादरूप]प्रयोजनानि क्व। कीदृशाः—प्राणिभिश्चेतनैः बोध्याः। कीदृशैः पटुकरणैः दर्शनादिसमर्थेन्द्रियैः। तथाऽचेतनो मेघश्चेतनकृत्यं कथं [क]र्त्तेति न गणित[वानिति भावः।]···अत एवात्यन्तासंभवेऽर्थे द्वौ क्वौ प्रयुज्येते। अनास्थायां वा क्वशब्दौ। औत्सुक्यहेतुमाह—**कामार्त्ताः** कामपीडिता जनाश्चेतनेष्वचेतनेषु च विवेचयितव्येषु [प्रकृत्या स्वभावेन कृ]पणा विकला दैन्यवन्तोऽज्ञा वा भवन्ति। कामवशे चेतनादिविवेको [न] भवतीति भावः। यद्वा चेतना चैतन्यं चेतनेषु भवति। कामार्त्ताः पुनः [स्वभाव]दीना एव भवन्तीत्यर्थः। [प्रकृतिकृपणत्वे]न मेघदौत्यमपि संगच्छत इत्यनौचित्यपरीहारः कवेरपि कटाक्षितः। उत्सुकचेतसां भ्रमस्तु युक्त एव। यदाह भरतः—

निद्रानाशश्च चिन्ता च भ्रान्तिश्चोत्सुक च····।
·························द्विधा सापि निगद्यते ॥
अतत्त्वे तत्त्वरूपा या तत्त्वे चातत्त्वरूपिणी

ज्योतिस्तेजः सलिलं[2] जलं **मरुद्वायुः**। निरक्षन्ति ये रक्षास्ते स्युर्गुह्यकसंज्ञकाः इति मेदिनिकरः।

मेघं प्रशंसति[3]—

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां-
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं-
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥६॥

---

१. 'उत्कण्ठात्' इति मा०।
२. 'शालिलं' इति मा०।
३. प्रशंसन्ति इति मा०।

अहं **त्वां जानामि**। कीदृशम्,—**पुष्करावर्तकानां** मेघ [भेदानां विख्या] ते कुले उत्पन्नम्। अनेन कुलीनत्वमुक्तम्। **मघोन** इन्द्रस्य **प्रकृतिपुरुषं** मन्त्रिजनम्। अनेन महत्त्व [मुक्तम्]। कामरूपं स्वेच्छाधीनाकारम्[1]। अनेन सर्वम] न्यकौशलम्। तेन कुलशीलादिमत्त्वेन त्वद्विषये **अर्थित्वं** याचकत्वमहं गतः। **विधिवशाद्दूरायत्तो** दूरे **बन्धुः** प्रिया यस्य तादृशोऽहम्। यद्वा त्वया किमिति स्वार्थं [बन्धुरेव न] याच्यत इति मेघवचनमाशंक्याह–दूरे बन्धवः सुहृदो यस्य सोऽहम्। अतस्तान्न याच इति भावः। मम महाजनस्य तव नियोगो न कर्त्तुमर्ह इत्याशंक्याह---**अधिगुणे** त्वादृशि [**मोघापि** निष्फला] पि याच्ञा **वरं** मनागिष्टा, **अधमे** नीचे **लब्धकामापि** सा प्राप्ताभिलाषापि न वरम्। महाजनत्वादेव मत्कार्यं करिष्यसि। अकरणे तु न मे क्षतिरिति भावः। **लब्धुकामेति** पाठे **लब्धुं** प्राप्तुं **काम** इच्छा यस्यां सा। **तुंकाममनसोरपीति** मलोपः। यद्वा **अधिगुणे याच्ञा** वरम्, अमोघा सफला [पि] अधमे न वरम्। **मोघालब्धकामा**[2] इत्युभयत्र नञः प्रश्लेष इत्यर्थः। **पुष्करावर्तसंख्यांककालकान्तिजलप्लवाः। इति वारिमुचो वंशा** [**श्चत्वारः**[3]] **परिकीर्तिताः। पुष्करावर्तकास्तत्र पुण्यवारिप्रवर्षिणः।** इति पुराणवाणी। यद्वा पुष्करावर्त्तकाः प्रलयकालीनमेघाः। **प्रकृतिर्गुण [साम्ये स्यादमात्यादि] स्वभावयोरिति विश्वः। मनागिष्टे वरं यत्तु कश्चिदाह तदव्ययमिति शाश्वतः** ॥६॥]

मेघस्योपकारकतामाह—

संतप्तानां त्वमसि शरणं तत्पयोदः प्रियायाः-
सदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां-
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥७॥

हे जलद **संतप्तानां** ग्रीष्मादितापं[4][व]तां जन्तूनां त्वं **शरणं** रक्षितासि। तस्मात् प्रियायाः कृते **मे** मम संदेशं **हर** प्रापय। **पयोदे**त्यनेन जलदानद्वारा तापहारकत्वमुक्तम्। मम तु संदेशहारकत्वेन तापहरो भवेरिति[5] भावः। **निसृष्टार्थोदितार्थश्च तथा** [6]**शासनहारकः। सामर्थ्योत्पादितो हीनो दूतस्तु विविधो मतः।** इति नानादूतमध्येऽयं शासनहारकः। कीदृशस्य मे कुवेररोषेण विरहिणः। तथा च प्रभुकोपान्मे विरहो

---

१. धिनाकारं इति मा०।
२. 'अलब्धकामायतः' इति मा०।
३. चतुर्य्यु इति मा०।
४. 'तापतां' इति मा०।
५. 'भवेदिति' इति मा०।
६. 'साशन०' इति मा०।

न तु पापादिनेति मय्यश्रद्धां मा कृथा इत्युक्तम्। सा मया क्व [1]प्राप्तव्येत्याशंक्याह—**अलका नाम** अलकेति प्रसिद्धा कुबेर**वसतिस्ते गन्तव्या** त्वया गन्तव्या। यक्षाणामीश्वरो यक्षेश्वरः। अत्र गौरवाद्बहुत्वम्। यद्वा यक्षाश्च ते ईश्वराश्च यक्षेश्वराः। द्विविधाः यक्षश्रेष्ठास्तेषां वसतिरित्यर्थः। उत्तरपदे प्रयुज्यमान[2]मीश्वरपदं श्रेष्ठवाचीति **शाब्दिकाः। प्रसिद्धौ नाम चाव्ययमिति** विश्वः। नामपदस्याभिधानार्थत्वे **प्रकृत्यादिभ्य उपसंख्यानमिति** तृतीया स्यादित्यवधेयम्। **ते** इत्यत्र **कृत्यानां कर्त्तरि वेति** तृतीयार्थे षष्ठी। मेघज्ञानार्थमलकाचिह्नमाह—बाह्यं च तदुद्यानं चेति **बाह्योद्यान**मुपवनम्। तत्रस्थ [हर] शिरःस्थितचन्द्रदीप्त्या श्वेताकृतानि धवलगृहाणि यत्र ताम्। कुबेरप्रीत्या चन्द्रचूडस्तत्र वसतीति प्रसिद्धिः। तथा च [3]तदसाधारण[चि]ह्नेन तां ज्ञास्यसीतिभावः। यक्षेश्वरदर्शनेन निधिप्राप्तिरपि सूचिता। यदाह—**दृष्ट्वा यक्षेश्वरास्तुष्टा जनानां निधिदायिनः**। हरावलोकनेन पुण्यवत्त्वमुक्तम्। रम्यहर्म्यवासेन कामोऽपि ते स्यादित्युक्तम्। यदाह—**रमणीयेषु देशेषु कामः संजायते नवः**। इति यद्वा वाह्यं वाहनीयमुद्यतं यानं वृषभस्तत्र स्थितो हरस्तच्छिरश्चन्द्रदीप्त्या क्षालितहर्म्येत्यर्थः। अनेन साक्षाद्भवानीपतिस्तत्र वसति इत्युक्तम्। तथा च त्रिवर्गलाभाय [4]त्वया तत्रावश्यं गन्तव्यम्[5]। प्रयत्नसाध्यत्वेन श्रम इत्युक्तम्। यद्वा समस्तजगतीजलवर्षकस्य तव सापि पुरी नित्यं गन्तव्या। अतो अर्थी चात्र सिद्धिमत्कार्यमिति भावः। **शरणं गृहरक्षित्रोरित्यमरः**। उष्यते अस्यामिति **वसतिः**। **चन्द्रिका[कौमुदी]ज्योत्स्नेत्यमरः** ॥७॥

निजोपकाराय विरहि [जनो] पकारितामस्याह—

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः-
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः[6]।
कः सनद्धे विरहविकलां[7] त्वय्युपेक्षेत जायां-
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥

····[**पथि]कवनिताः** विरहिण्यः **पवनपदवी**माकाशमुपगतं त्वां **प्रेक्षि[ष्यन्ते** प्रकर्षेण द्रक्ष्यन्ति]। कीदृश्यः **उद्गृहीतः** उत्तोलितो अलकः केशरचना [विशेषः] विरहवेदनया प्रसाधनाकरणा[ल्लम्बिता]लकावृतनेत्राभिः, अलका उत्तोलिता इति भावः। **अमलाम्बरधारणमलकानान्तु कल्पनम्**। **अनुलेपनसंस्कारं न कुर्या[त्प्रोषिता]ङ्गनेति**

१. स मया 'क्व प्राप्तव्य' इति मा०।
२. प्रयुज्यमान ईश्वर० इति मा०।
३. 'तुदसा०' इति मा०।
४. 'तया' इति मा०।
५. 'गन्तव्यमर्थाचयसिद्धं यत्कार्यमिति न पुक्' इति मा०।
६. श्वसन्त्यः इति पाठा०।
७. 'विधुरां' इति पाठा०।

भरतः। तथा **प्रत्ययात्** मेघकाले प्रियागमननिश्चयाद्विश्वासं कुर्वत्यः। वर्षान्तरेऽपि तथैवानुभवाद्विश्वास इति भावः। अनेन समुत्सुकनायिकादर्शनेन तत्र कामोऽपि ते स्यादित्युक्तम्। यद्वा **आशु** शीघ्रं त्वदवलोकनादेव **असत्यः** असाध्व्यः। सस्पृहं परावलोकनात्। वर्षाकाले नायकागमने हेतुमाह—**त्वयि संनद्धे** वर्षणाय कृतसंरम्भे **को** जनः प्रियां विरहविकला**मुपेक्षेत** त्यजेत्, किन्तु न कोऽपि। त्वमेव विषमबाणरोपणकारणमिति भावः। **सन्नद्ध**पदेन गर्जितादिसंपत्तिरुक्ता। तर्हि त्वमेव कथं कान्ताविरहित इत्यत आह—**अन्यो जनो**ऽहमिव मत्तुल्यो **न स्यात्** न भविष्यति। संभावनायां प्रार्थनायां वा [लिङ्]। योऽहं **पराधीनवृत्तिः** परायत्तव्यापारः। तथा च परायत्ता प्रियोपेक्षा ममेति भावः। यद्वा यो [ऽहमिव जनः] स पराधीनवृत्तिरेव **न स्यात्** न भवतु। अनेनात्युद्वेगादात्मनः शोच्यत्वमुक्तम्। **वृत्तिर्वर्त्तनजीवनमिति विश्वः** ॥८॥

मेघोत्साहाय यात्रायां शकुनमाह—

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगर्वः[1]।
गर्भाधानक्षणपरि[2]चयान्नूनमाबद्धमालाः
सेविष्यन्ते[3] नयनसुभगं[4] खे भवन्तं बलाकाः ॥९॥

मन्दं मन्दं [अतिशयेन म]न्दं यथा तथानुकूलः पवनस्त्वां **यथा** येन प्रकारेण प्रेरयति। च [पुनः] तव वामो वामपार्श्वस्थः **सगर्वो** हृष्टः स्वेच्छया मेघजललाभा**न्मधुरं** यथा तथा **चातकः** पक्षिभेदश्च यथा नदति शब्दायते। चकारौ मिथः साहित्येनातिशकुनमाहतुः। तथा शकुनेन नूनमुत्प्रेक्षे आबद्धमालाः कृतपंक्तयो **बलाका** बक्यः **खे** व्योम्नि भवन्तं **सेविष्यन्ते** आश्रयिष्यन्ते कीदृशं **गर्भाधाने** गर्भलाभे **क्षणपरिचयं** योग्यदर्शनम्, मेघसमये बकानां गर्भाधानात्। **नयनसुभगं** नेत्रह्लादकं विद्युदादियोगात्। बलाकस्य स्त्री बलाका। **पुंयोगादाख्यायामिति** न ङीष्, तद्विधेरनित्यत्वात्। **'बलाका बकपंक्तौ स्याद्बलाका विशकण्टिका। बलाकां कामुकीमाहुर्बलाकस्तु बको मतः'** इति **धरणिः**। बकपंक्तिपक्षे [तु आबद्धमा]लात्वेन पंक्तेराधिक्य[सूचनात्पंक्ते]मालाकारत्वमप्युक्तम्। **बलाका** विशकण्टिकाः पक्षिभेदा एव। यद्वा **बलाकाः** कामुक्यो भवन्तं सेविष्यन्ते। आबद्धमालाः परिहितस्रजः [सुभग]त्वेन गर्भाधानक्षमत्वेन च मेघस्य [नायकत्वं] युज्यत एव। अन्यापि कामुकी मालावती तादृशं नायकं

१. 'सगन्धः' इति मल्लि०।
२. गर्भाधानक्षणपरिचयं, वि०, सम० स्थिर०।
३. 'प्रेक्षिष्यन्ते'।
४. सुखदम्।

सेवत इति ध्वनिरप्युन्मिषति। तदिह प्रथमार्द्धेन शकुनं द्वितीयेन स[हाय]सं[पत्तिरु]-क्ता। **'वामे मधुरवाक्पक्षी वृक्षाः पल्लविनो गताः। अनुकूलो वहन् वायुः प्रयाणे शुभसूचकः'** इति **वसन्तराजः**। अनुकूलो नातिचण्डो वायुः **त्वां यथा नुदति** जलान्त-रौ[दास्येन मेघा]प्रार्थना**द्वामो** वामप्रकृतिरपि चातकः.................मधुरं नदति। तथा तेनैव लिंगेनानुमीयते। वलाका अपि त्वां सेविष्यन्ते। तथा चैतत्त्रितयलाभे शोभा .... दित्युक्तम्। चलेनाप्यनुकूलता, वामेन सगर्वेण चापि मधुरत्वं चेदा-लम्बितमतस्तत्पुण्ये[न व]कादिसंपत्तिरपि ते स्यादित्याशयः। **मन्दं** [1]मन्दमिति **नित्य-वीप्सयो**[रिति द्वि]र्वचनम्। **प्रकारे गुणवचनस्येति** द्विरुक्तिः। **वामः सव्ये मनोहर** इति विश्वः ॥९॥

शकुनान्निश्चितं तद्दर्शनमाह—

तां चावश्यं दिवसगणनातत्परामेकपत्नी-

मव्यापन्नामविह[2]तगतिर्द्रक्ष्यसि भ्रातृजायाम्।

आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां-

सद्यः पा[3]ति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥१०॥

तां पुनः त्वमवश्यं द्रक्ष्यसि। **च** पुनरर्थे। कीदृशीं शाप[दिनानां या] **गणना** संख्यानं तदेव परं यस्याः ताम्। इयन्ति गतानि[4], इयन्ति दिनानि गमयितव्यानि इति गणयन्तीमित्यर्थः। अत **एवाव्यापन्ना**मविनष्टाम्। इदं शकुनादपि निश्चिनोमी[ति भावः]। एकः अहमेव पतिर्यस्याः **सैकपत्नी** तां पतिव्रतामित्यर्थः। अनेनानन्या-सक्ता पतिव्रता। **भ्रातृजायां** भ्रातृवधूम्। यद्वा भ्रातृभुक्ता जाया भ्रातृजाया **शाकपार्थिवादिः**। अनेन मेघस्य वा आकांक्षा निरस्ता। यद्वा 'सा पतिव्रता, कथं रहस्तां संदेशेन प्रीणयिष्ये' इति शंकापनोदाय विशेषणमिदं तथा च सा पतिव्रतापि भ्रातृजाया [अतस्तां[5]] रहो द्रक्ष्यसीति भावः। त्वं कीदृशः **अविह[6]ता** अविलंबिता निर्विघ्ना वा **गति**र्गमनं यस्य सः। इच्छारूपित्वादाकाशगत्वाच्च। अनेनान्तःपुर-योग्यतोक्ता। तदव्यापन्नत्वे युक्तिमाह—**[हि]** यतः बाहुल्येनांगनानामुत्तमस्त्रीणां चित्तं **सद्यः पाति** तत्क्षण[पतन]शीलं **प्रणयि** प्रेमान्वितं **विप्रयोगे** विश्लेषे सति **आशा-बन्धः** प्रत्याशाबन्धो बन्धनं प्रत्याशार्थं बन्धो वा समाश्वासो वा **रुणद्धि** वारयति। अन्यदपि सद्यः पतनशीलं किल बन्धेन रुध्यत इति ध्वनिः। कीदृशं **पुष्पतुल्यं**

१. 'मन्दमिति' इति मा०।
२. 'अविहित' इति पाठा०।
३. 'पातप्रणय' इति पाठा०।
४. 'गतानां' इति मा०।
५. 'जायास्तु तां' इति मा०।
६. 'अविहिता' इति मा०।

सुकुमारत्वात्, स्वल्पविपत्तिविनाश्यत्वाद्वा। नियतमागमिष्यति कान्तः। ततो यथेष्टं विहरिष्यामीत्याशावियोगिनीजीवन इति भावः। पुष्पमपि वेः पक्षिणः प्रयोगे पतने सति सद्यः पात्याशाबन्धेन मर्कटजालेन रुध्यते। यद्वा पुष्पमपि विप्रयोगे वृन्ताद्भ्रंशे सद्यः पतदाशाबन्धेन रुध्यत इत्युक्तिश्लेषः। एकपत्नीत्यत्र सपत्न्या[1] दिगणे निपातनादन्ते नत्वम्। **आशाबन्धः समाश्वासे तथा मर्कटजालक** इति विश्वः ॥१०॥

पुनः संपत्तिमाह—

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रात[2]पत्रां-

तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।

आ कैलासाद् विसकिसलयच्छेदपाथेयवन्तः-

संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥११॥

आकैलासात् कैलाशाद्रिपर्यन्तं **नभसि** व्योम्नि **राजहंसा**[श्च **भ**]**वतः सहायाः संपत्स्य[न्ते** भ]विष्यन्ति। कीदृशाः **विसकिसलयस्य** पद्ममूलपल्लवस्य **छेदः** खण्डः स एव **पाथेयं** सम्बलं प्रशस्तं बहुलं वा येषामस्ति ते। भूम्नि प्रशंसायां वा मतुप्। अत एव कर्मधारयमत्वर्थीयाद्बहुव्रीहिरेवेष्टो लघुत्वादिति मतुपो [दाढ्य॑मिति] शंकायां नावकाशः। बहुव्रीहिणा भूमप्रशंसादेरलाभात्। यद्वा **विसकिसलयच्छेदेन** पाथेय वन्तः ससंवला इति तृतीयासमासः। उत्तरशब्दितं कर्णमनोहरमाकर्ण्य मानसे सरसि **उत्का** गमनायोन्मनसः। वर्षाकाले राजहंसा मानसं सरो यान्तीति प्रसिद्धिः। यद् गर्जितं कर्तुं भूमिमुद्गत**शिलीन्ध्र**पुष्पमेवातपत्रं यस्यास्तादृशीं **कर्त्तुं प्रभवति** [ई]ष्टे। शिलीन्ध्रं कन्दलीपुष्पं कठच्छतिरिति वा। **च** पूर्वापेक्षया समुच्चये। एतेन विश्वं-भरापि त्वद्दर्शनेन छत्रमण्डिता भवतीत्युक्तम्। तदि [ह] सहायसंपत्तिर्दर्शिता। [सगर्व]विसादिसंवलयोगेन तद्दानचिन्ताप्यपास्ता। कैलासपर्यन्तगमनेऽस्थान-निवर्त्तिता तस्यापास्ता। अन्यथापि चक्रवर्त्तिनो गर्जितमा[ज्ञा]प्रधानं गुरुवचः श्रुत्वा अन्ये राजहंसाः राजश्रेष्ठा मानसे चित्ते उत्काः साशंकाः सहाया जायन्ते। निर्वलतया फलमूलाधाशिनः। यद्गर्जितं राजसेन केशोद्गतशिलीन्ध्रसमच्छत्रां महीं कर्त्तुं प्रभवति। यद्वाक्यमात्रेण नृपसैन्येन सच्छत्रा मही जायत इत्यर्थः। गर्जितं कीदृशं **श्रवणसुभगं** श्रुतिमात्रमधुरमथ च परिणामविरसमित्यर्थ इति ध्वनिः। **पाथेय-**मित्यत्र **पथ्यतिथिस्वपतेर्ढक्। शिलीन्ध्रं कदलीपुष्पे करके नेति मेदिनिकरः** ॥११॥

शीघ्रगमनार्थं संवादमाह—

१. नदादिग. इति मा०।
२. 'उच्छिलीन्ध्रामवन्ध्यां' मल्लि०

आपृच्छस्व प्रियसखममुं तुंगमालिंग्य शैलं-
वन्द्यैः पुंसां रघुपतिपदैरंकितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य-
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥१२॥

तत् त्वम् **अमुं शैलं** रामगिरिम् **आपृच्छस्व** संवद[स्व]। आपृच्छा प्रीत्या संभाषणं वा। **आङि नुपृच्छ्योरिति** तङ्। कीदृशं प्रियसखं प्रीतिमित्रम्। **तुंग-मुच्चैः** शिरसम्। **रघुपतिपदैः** दाशरथिपदैर्न्निर्तम्रभूमिषु चिह्नितम्। अनेन गिरे-र्मान्यत्वमुक्तम्। विष्णुपददर्शने विधातुः[1] पुण्यवत्त्वञ्च सूचितम्। किं कृत्वा, **आलिंग्य** परिष्वज्य। आश्लिष्टसानोरप्यस्य पुनरालिंगनमतिस्नेहार्थम्। पदैः कीदृशैः पुरुषाणां[2] नमस्करणीयैः। पापनाशकत्वात्। मित्रत्वे हेतुमाह—**यस्य** गिरे**र्भवतः** संपर्कं प्राप्य **काले काले** प्रतिवर्षं **स्नेहव्यक्तिः** प्रीत्यभिव्यक्तिश्चैतन्या[3]भिव्यक्तिश्च जायते। यस्य कीदृशस्य **चिरविरहजं** बहुकालत्व[द्] वियोगजातं तप्तवाष्पमूष्माणं त्यजतः। ग्रीष्मतप्तस्य नवजलसेका[द्] बाष्पवत्त्वं स्निग्धता च भवतीति भावः। अन्योऽपि मित्रयोगाद्दुःखे ऊष्णमश्रु त्यजति, तत्संपर्के च प्रीतो भवति। शोकजम-मूष्णमानन्दजं शीतलमिति व्यवस्था। मैत्री समानशीलेनोचिता। यदाह—**समान-शीलव्यसनेषु सख्यमिति**। आपृच्छिः संवादार्थ इति **शाब्दिकाः**। प्रियश्चासौ सखा चेति **राजाहःसखिभ्यष्टच्**। **मेखला खड्गबन्धे स्यात्काञ्चीदामनितम्बयो-रिति विश्वः**। **काले** इत्यत्र **नित्यवीप्सयोरिति** द्विरुक्तिः। **चैतन्ये प्रेम्णि च स्नेह** इति **धरणिः**। श्लेषाविद्धोत्प्रेक्षालंकारः ॥१२॥

मार्गं तावच्छृणु[4] कथयतस्त्वत्प्रयाणानुरूपं[5]-
संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्[6] ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र-
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य[7]॥१३॥

तावच्छब्द उपक्रमे। हे **जलद** मम **कथयतो** अभिदधानस्य **मार्गं तावद्** वर्त्म श्रृणु। यद्वा कथयतो मत्त इत्यर्थः। **आख्यातोपयोग** इत्यपादानत्वम्। कीदृशं

1. 'विधातारः' इति मा०।
2. 'पुरुषान्नमस्करणैः' इति मा०।
3. चैकन्या इति मा०।
4. 'मत्तः श्रृणु', का० पा०।
5. अनुकूलम्।
6. 'श्रव्यबन्धम्', का० पा०।
7. 'चोपयुज्य', का०पा०।

त्वद्गमनयोग्यम्। **तदनु** मार्गश्रवणानन्तरं **संदेशं श्रोष्यसि**। **श्रोत्रपेयम्**, अनुरागा-विद्धतया श्रुतिमधुरम्. शब्दात्मकत्वात्। अनेनोद्वहनश्रमादिकमपास्तम्। मार्गे श्रान्तः सन् **शिखरिषु** गिरिषु **पदं न्यस्य** स्थितिं कृत्वा **गन्तासि** गमिष्यसि। यदाह—**पथि विश्रभ्य-गन्तव्यं विश्रामाज्जायते नवम्**। अनेअ गमनश्रमो निरस्तः शिखरिष्विति प्रायिकम्, अग्रे हर्म्येष्वपि [वि] श्रामकथनात्। क्षामक्षामश्च **स्रोतसां** नदीप्रवाहाणां **पयो** जलं पीत्वा गन्तासि। **परिलघु** लघुतरम्। अनेन जलपानगौरवमंथरता अपास्ता। **दीपनं पथ्यं लघु शीतः सम्रुद्भव** इति **वैद्यकम्**। **स्रोतसामि**त्यपि प्रायिकम्, अग्रे मानसजलस्य कथनात्। खिन्न इत्यादौ **आभीक्ष्ण्ये द्वे भवतः** इति द्वित्वम्। गन्तेति लुटि[1]। **स्रोतो-ऽम्बुवेग इन्द्रिये** इति विश्वः ॥१३॥

मार्गमेव कथयति—

अद्रेः श्रृंगं हरति[2] पवनः किंस्विदित्युन्मुखीभि-
[3]र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धांगनाभिः ।
स्थानादस्मात्सरनिचुलादुत्पतोदङ्मुखः खं-
दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान्[4] ॥१४॥

हे मेघ **उदङ्मुख** उत्तराभिमुखः सन्, गन्तव्यालकाया उत्तरदिग्वर्तित्वात्. **अस्मात्** स्थानात् चित्रकूटात् **खमाकाशं** त्व**मुत्पत** उर्ध्वं गच्छ। उत्पतनस्योर्ध्वगमन-त्वेन खमिति लब्धे अतिदूरत्वार्थं खमित्युक्तम्। कीदृशात् **सरसनिचुलात्** पुष्पितपल्ल-वितेज्जलवृक्षात्। अनेन **वृक्षाः पल्लविनोऽग्रत** इति मंगलसूचनम्। वने दिग्गजानां **स्थूलहस्तावलेपान्** पीवरकरप्रहारान् परित्यजन्[5]। स्थूलेत्यनेनाभिघातातिदुःख······· परीहारः प्रहाराणामुक्तः। उर्ध्वगमनेन च तत्परीहारोपाय उक्तः। दिग्गजाः किल ग्रीष्मतप्ताः सेकार्थमेवं [कुर्व] न्तीति प्रसिद्धिः। **गजशिक्षापि—**

अवस्थां पञ्चमीं प्राप्ता दृष्टा दृष्ट्वाम्बुदं गजाः ।
संतापशान्तये तप्ताः क्षिपन्ति स्थूलहस्तकान् ॥ [इति]

अत एव स्थूलहस्तशब्दः समुदित एव करिकरे वर्तत इत्यपि पक्षः। त्वं कीदृशः, **अद्रेः** पर्वतात् **श्रृंगं** शिखरं **किंस्वित्पवनो हरति**। तदुपरिपतनशंकया **चकितचकितं**

1. 'लुट्' इति मा०।
2. 'वहति' इति वल्ल०।
3. 'दृष्टोच्छ्रायः' वल्ल० वि०।
4. 'लेहान्'।
5. 'परित्यजन् सन्' इति मा०।

भीतभीतं यथा तथा **मुग्धसिद्धांगनाभिः** स्त्रीभिरुर्ध्वमुखीभिर्दृष्ट्योद्गमः (?)। व्योमस्थाः सिद्धांगना अद्रा-[वुद्यन्तमब्दमालोक्य तत्] तर्कयन्तीत्यर्थः। मुग्धपदेन तासां विशेषानभिज्ञता सहजभीरुता चोक्ता। उदङ्मुखत्वेन मेघस्योपरिसंचरणयोग्यतोक्ता[1]। किंस्विदिति वितर्के। तथा चामरः—**किंस्विद्वितर्के किमुत** इति। चकितेत्यत्र **प्रकारे गुणवचनस्येति** द्वित्वम्। **आलजादिगुणोपेतः सिद्धः सद्भिरुदाहृतमिति शाश्वतः। निचुलोऽम्बुज इज्जल इत्यमरः। खमाकाशमुदाहृतमित्येकाक्षरकोषः। गर्वप्रहारयोरुक्तभरणेऽपपदं बुधैरिति धरणिः।** अत्र मुग्धांगनादर्शनेन काम्यरूपत्वं कामित्वञ्चोक्तम्। न च गमनकाले प्रहारादिपरिहारोद्भावनस्य गमनप्रतिकूलतया तदनर्हं इति वाच्यम्, परिहारस्या·······साध्यत्वप्रतिपादनाय तदभिधानात्। अनभिधाने तु वर्षान्तरेऽनुभूततया[2] यक्षस्यानाप्तत्वाबोधात्तत्कार्याकरणप्रसंगाच्च ॥१४॥)

मंगलदर्शनाच्छोभालाभोऽपि स्यादित्याह—

[3]रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य।
येन श्यामं वपुरतितरां कान्तिमालप्स्यते[4] ते-
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥१५॥

पुरस्तात् पूर्वस्यां दिशि **वल्मीकाग्रात्** सातपमेघाग्रात् वामलूराग्राद्वा **आखण्डलस्य** इन्द्रस्य **एतत् धनुःखण्डं प्रभवति** जायते। कीदृशं रत्नादीनां मणीनां **छायाव्यतिकरः** कान्तिसमूह इव, नानावर्णत्वात्। अत एव **प्रेक्ष्यं** सुन्दरम्। **पुरस्तात्** पूर्वदिशि इति व्याख्याने उत्तराभिमुखमेघस्य दक्षिणतो धनुर्मण्डलं भवति। यदाह—

यातुर्दक्षिणतो भूतमुद्यद्दिवि निरन्तरम्।
यात्रायामनुकूलं च धनुरैन्द्रं सुखावहम् ॥ [इति]।

पुरस्तादग्रत इति [5]व्याख्याने, अग्रतः सुरचापन्तु न शोभनफलप्रदमिति निषेधात्। **येन** धनुःखण्डेन तव **श्यामं वपु**[6]रत्यर्थं शोभामालप्स्यते प्राप्स्यति। यथा गोपालमूर्त्तेः कृष्णस्य श्यामं वपुः स्फुरितदीप्तिना मयूरपिच्छेन [7]कान्तिमत्यर्थं प्राप्नोति। कृष्णः क्रीडार्थं मयूरपिच्छगुच्छं धारितवानिति **पुराणम्**। मेघस्य कृष्णेन, धनुषो

१. 'योग्यतोक्तम्' इति मा०।
२. 'अनुभूतया', इति मा०।
३. 'रत्नच्छाय०' का० पा०।
४. मापत्स्यते, इति पाठा०।
५. 'व्याख्यानं' इति मा०।
६. 'रित्यर्थं' इति मा०।
७. 'कान्तित्यर्थं' इति मा०।

बर्हेण साम्यम्। तथा च यावदिन्द्रधनुषः सौन्दर्यं त्वयि तावद्व्रज शीघ्रमिति भावः। खण्डपदेन धनुष उत्पद्यमानतया असंपूर्णत्वमाह। **छाया सूर्यप्रिया कान्तिरिति विश्वः। आदर्शदर्शनं याने मंगलानाञ्च कीर्त्तनम्। रत्नानां कीर्त्तनञ्चैव तथा विष्णोश्च कीर्त्तनमिति** रत्नादिकीर्त्तनं मंगलार्थम्। **वल्मीकः सातपे मेघे वामलूरेऽद्रिशृंगके** इति **धरणिः**। वासुकिनिश्वासः फणामणिमरीचिनिचयसंवलितो वामलूररन्ध्रनिर्गतो व्योम्नि शक्रचापतामाप्नोति इति **आगमवेदिनः**। धनुःखण्डमिति नित्यसमासे **अलुगुत्तरपदस्येति** षत्वम्? अग्रादित्यत्र **भुवः प्रभवः** इत्यपादानता।····आत्मभिः स्मरणार्थः इति नोभाभ्यामिति विवक्षितार्थसिद्धिः। मैवम् धातूनामनेकार्थत्वात्। तथैव नानाप्रयोगदर्शनात्। यद्वा **आपत्स्यत** इति पाठः। **पद गतौ** लृट्। यद्वा कान्तस्य भावः कान्तिमा कान्तत्वं कस्य येन धनुःखण्डेन तव वपुः कर्म आप्स्यते प्राप्स्यति। इतरत्समानम् ॥१५॥

निजोपकारदार्ढ्यायास्य सर्वोपकारितामाह—

त्वय्यायत्तं कृषिफलमिति भ्रूविका[1]रानभिज्ञैः-
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।
सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं-
किंचित्पश्चाद्व्रज लघुगतिर्भूय[2] एवोत्तरेण ॥१६॥

किञ्चित्पश्चात् पश्चिमदिशि **किञ्चिदेवोत्तरेण** उत्तरस्यां दिशि त्वं **व्रज** गमिष्यसि। भविष्यति, प्रार्थनायां लोट्। कीदृशः **लघुगतिः** शीघ्रगमनः। **त्वयि कृषिफलं** शस्यफलमायत्तमधीनमिति हेतोः **प्रीत्या** प्रेम्णा **स्निग्धैः** ग्रामीणरमणीनेत्रैः **पीयमानः**। ग्रामीणत्वादेव नेत्रोपरि रोमराजी भ्रूस्तद**विकारो** विभ्रमः त**दनभिज्ञैः** [अ]-कुशलैः। किं कृत्वा सद्यस्त्वद्गमनादेव **सीरोत्कषणेन** हलकषणेन **सुरभि** सुगन्धं **मालं क्षेत्रमारुह्य** प्राप्य। **मालो** देशभेदः। तत्र क्षेत्रं मालदेशेनोक्तम्। यद्वा **मालं** गिरिसीमा, तद्रूपं क्षेत्रमारुह्य। यद्वा मालनामकं क्षेत्रमित्यर्थः। **मालं देशेऽद्रिसीमायां क्षेत्रभेदेऽपि कीर्तित इत्यमरमाला**। त्वयि सफलं न तु त्वद्विषये फलमिति विषयज्ञानादनभिज्ञत्वाद्ग्राम्यवधूरित्युक्तम्। नागरीणामेवमज्ञानात्। ग्राम्यवधूनेत्रपानेनातिप्रमोदशालित्वमुक्तम्।

यदाह— **यथा स्वभावसंपन्ना रम्या ग्रामीणयोषिताम्।**
विलासा नागरस्त्रीणां न तथा रमयन्ति नः ॥

१. 'भ्रूविलासानभिज्ञैः' पाठा०।
२. 'किञ्चिदेवोत्तरेण' वि०।

हलं गोदारणश्च सीरश्चेत्यमरः। **सुरभी**त्यनेन सौरभशालितया हर्षवत्त्वं मेघस्योक्तम्। गमनोत्साहार्थं**मुत्तरेणे**ति विभक्तिप्रतिरुपको निपातः। यद्वा [1]प्रकृत्यादित्वात्कर्मत्वेऽपि प्राप्ते तदविवक्षायां तृतीया ॥१६॥

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना-
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय-
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥१७॥

आम्रकूटो नाम **सानुमान्** गिरिस्त्वां **मूर्ध्ना** मस्तकेन शृंगेणेति यावत् **साधु** यथा तथा **वक्ष्यति** धारयिष्यति। यद्वा शिरसा धारयिष्यति यत्तत्साधु योग्यमेव। यद्वा **साधु मूर्ध्ना** योग्यशिरसेत्यर्थः। कीदृशम् **आसारेण** जलधारापातेन प्रशमितः शान्तिन्नीतो वनाना**मुपप्लवो** दावाग्निरुपो येन तम्। वर्त्मश्रमेण युक्तञ्च। कृतोपकारस्य श्रान्तस्य शिरोधारणं सतामुचितमेवेति भावः। अर्थान्तरन्यासमाह—**संश्रयाय** आश्रयार्थं **प्राप्ते** सति पूर्व**सुकृतापेक्षया** [2]पूर्वशोभनकृतोपकारार्थवोधेन क्षुद्रोऽपि हीनप्रकृतिरपि **न विमुखो भवति**। यस्**तथा** तेन प्रकारेणो**च्चैः** अत्युच्चो महान् स किं पुनर्विमुखः अपि तु न स्यादित्यर्थः आदरातिशयमेव स तनोतीति भावः। तथा चायमप्युच्चैः शिरा-शिरसा धारयतीत्युचितमेव। वक्ष्यतीति **वह प्रापणे** लृट्। शोभनं कृतं सुकृतमुपकारः। यद्वा [3]प्रथमसुकृतमातिथ्यम्। तथा च स्मृतिः—

हवनं भूतबलिं चापि स्वाध्यायान् पितृतर्पणम्।
कुर्यात् प्रथमसुकृतं याजनञ्च दिने दिने॥ [इति]।

मित्र इत्यनादरे सप्तमीति वा। प्राप्तं मित्रमनादृत्येत्यर्थः ॥१७॥

अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट-
स्तुंगेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्नि-
सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥१८॥

हे **जलद** चित्रकूटनामा गिरिः **श्लाघमानः** आप्रीयमाणः **प्रतिमुखगत**मभिमुख-गमिव त्वां मार्गश्रान्तं शिखरेणौन्नतेन धारयिष्यति। शिरोधारणैनैवादर उक्त। प्रति-

१. प्रकृत्वा० इति मा०।
२. 'पूर्वशोभन०' इति मा०।
३. 'मतिथ्यं' इति मा०।

मुखगमनेनावश्यधार्यतोक्ता। चित्रकूट इति नामद्वाराश्चर्यकूटकथनात्तदभिमुखगमना-वश्यकतोक्ता। जलदेत्यनेन जलदानद्वारा दावानलशान्तियोग्यतोक्ता। एतयेवाह (?)। त्वमपि तस्य गिरेः निदाघकालीन**मग्निं** दावानलं जलधाराभिः **शमयेः** उपशमयिष्यसि। अत्रार्थन्तिरन्यासः। **सद्भावो** विशुद्धाशयत्वम्, **तेनार्द्रः** स्निग्धः [1]उपकारो महाजनेषु [2]चिरेण न फलति, अपि त्वचिरेणैव। तथा च तद्गिरिकृत शिरोधारणरुपोपकारो भवानपि महान् दवदहनहरणेन तमुपकरिष्यतीति भावः। **धारासंपात आसार इत्यमरः** ॥१८॥

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारुढे शिखरमचलः स्निग्धवेणीसवर्णे।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां-
मध्ये श्यामः स्तन इव भुवः शेषबिस्तारपाण्डुः ॥१९॥

अय**मचलः** शैलः चित्रकूटः **अमरमिथुनप्रेक्षणीयां** देवस्त्रीपुंसदृश्या**मवस्थां** दशां यास्यति इत्युप्रेक्षे। **नूनं** शब्द उत्प्रेक्षायाम्। **स्निग्धवेणीसवर्णे** चिक्कणवेणीतुल्यरूपे **त्वयि** शिखरमारूढे सति शिरःस्थितत्वेन श्यामत्वेन च वेणीमेघयोः साम्यम्। कीदृशः, पक्वफलैर्वनाम्रवृक्षै रावृतपर्यन्तः। **भुवः** पृथिव्याः **स्तन इव** मध्ये **श्यामः** नीलमे-घाक्रान्तत्वात्, **शेषविस्तारे** अग्रभागादन्यभागाभोगे **पाण्डुः**। पक्वाम्र[3] इव तरुणी-स्तनोऽपि चूचुकभागे श्यामः शेषविस्तारे पाण्डुश्च भवति। 'देवमिथुनानां सुरतासक्त-तथा तथा प्रतिभास उचितः एकस्तनकथनमपरस्तनस्य तेनावगमात्[4]। यद्वा विभ्रमा-सक्ता नागरी प्रिये स्तनमेकमेव दर्शयति। यदाह—**सव्याजांशुकविक्षेपादेकं संदर्श-येत्स्तन**मिति। अनेन भूनायिकाया[5] विभ्रमोऽप्युक्तः। यदाह—

वाहुमूलं स्तनं नाभीमूरुमूलं च मेखलाम्।
व्याजतो दर्शयेद्यत्र वामासौ विभ्रमो मत॥ [इति]।

फलेन द्योतितं शीलं येषां तैस्ताच्छीलिकोणिनिः। काननाम्रैरित्यत्र काननपदेनारण्य-तात्पर्यकेण ग्रामाम्रफलतो अतिपाकिमफलशालितोक्ता। **वेणी केशस्य बन्धने इति विश्वः**। शैलोपरिवर्तिभिरेव तद्रूपेणोत्प्रेक्षणं न त्वधोवर्तिभिरिति देवमिथुनोप-न्यासः ॥१९॥)

१. 'उपकारे' इति मा०।
२. 'त्वचिरेण' इति मा०।
३. 'पक्वाम्रै रेव' इति मा०।
४. 'तेनावलात्' इति मा०।
५. 'भूनायिकाद्वाम०' इति मा०।

स्थित्वा[1] तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं-
[2]तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां-
भक्तिच्छेदैरिव विरचितां भूतिभंगे गजस्य ॥२०॥

त्वं **रेवां** नर्मदां द्रक्ष्यसि । कीदृशीम्, **उपलविषमे** पाषाणनिम्नोन्नते **विन्ध्यपादे** विन्ध्यस्य प्रत्यन्तपर्वते **विशीर्णां** पतिताम् । त्वं कीदृशः. **वनचरवधूभिर्भुक्तः** सुरतोपयुक्तीकृतः कुञ्जो लतादिगहनस्थानं यस्य तत्र चित्रकूटे क्षणं स्थित्वा । **तोयोत्सर्गात्** जलवर्षणात् शीघ्रतरगतिः सन् । **तत्परं** ततः परं **वर्त्म** तीर्णोऽतिक्रान्तः । **भक्तिच्छेदैः**कृताविभागैर्विरचितां गजस्यांगे भूति [जन्य] मण्डलमिव । **स्थित्वेत्यनेन** वनचररतावलीकनसुखार्थमपि त्वया क्षणं निश्चितं विलम्बनीयमित्युक्तम् । **उपलविषमे** नानामणिना निम्नोन्नते[3] नायकपदे पतिता । प्रणयकलहान्तरमन्यापि नायिका [एवं] भवतीति ध्वनिः । मेघो नायकः रेवा नायिका, वासो विन्ध्यपादः । नायिकापि वासकसज्जा । यदाह—

वासवेश्मनि विस्तीर्णपर्यंके या प्रतीक्षते ।
प्रियागमनमेषा तु वासकज्जाभिधीयते ॥

रेवा तु नर्मदेत्यमरः । पादाः प्रत्यन्तपर्वताः इति च । **भूतिः स्याद्भस्मसंपत्त्योर्भूतिस्तु करिमण्डलम्** इति **धरणिः** । भूत्युपमया, उच्चावचशिलाचयविश्रृंखलपतने गजश्यामतयेवार्थगा[4] सा नित्यं दृश्येत्युक्तम् ॥२०॥

रेवादर्शनफलमाह—

[5]तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बु-[6]कुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तः सारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां-
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२१॥

वान्तवृष्टिः त्यक्तजलराशिः सन् **तस्याः** रेवायाः जलं गृहीत्वा **गच्छेः** गमिष्यसि । कीदृशम्, **तिक्तैः** सुगन्धिभिर्वनगजानां स्नानपानार्थं तदम्भसि भग्नानां **मदै** र्दानवारिभि**र्वासितं** सुरभीकृतम् । अनेनास्य जलस्य वैलक्षण्यम् । रेवाया अवश्योपादेयत्व [हेतुरित्युक्तं भवति । त्वं ब्रूयाश्चेद्] विकीर्णजलतया कथं तत्तोयं ग्रहीष्यामीत्यत आह—जम्बूनिकुञ्जापनीतवेगम् । तथा च तत्र न विषमजला [से]ति भावः । तज्जलं च पतितजम्बूफलमधुरास्वादमतीव तत्कालोचित [दानं]·······स्यादित्यपि ध्वनितम् । तोयादाने हेतुमाह—हे मेघ ! **अन्तः सारम**भ्यन्तर स्थितवलं त्वां **तुलयितुं** सञ्चालयितुम् **अनिलो** वायुर्न **शक्ष्यति** न शक्तो भविष्यति । तथा च वाताहतया न ते गमनं किन्तु स्वेच्छयैवेति भावः । अन्तःसारत्वेन घनतास्फोरणाय घनेत्यामन्त्रणम् । स्वोक्तमुपपादयति—यतो **रिक्तस्तुच्छः** सन् **सर्वो** लघुर्भवति । **पूर्णता** परिपूर्णत्वं **गौरवाय** भवति । तथा च जलपूर्णस्त्वं गुरुरिति न वाताहतत्वं तव स्यादित्याशयः । अन्योऽपि रिक्तो निर्धनः लघुरनादृतः, पूर्णता धनवत्ता आदराय भवति इति ध्वनिः । **तिक्तो रसे सुगन्धे चेति विश्वः** । **वान्त** इत्यत्र गौणवृत्त्याश्रयणान्न दोषः यदाह—

निष्पीतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥ इति दण्डी ।

शक्लृ शक्तौ, लृटि शक्ष्यतीति । रिक्तो निर्धनतुच्छयोरिति शाश्वतः ॥२१॥)

मार्गकथनमाह—

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
[1]जग्ध्वाऽरण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः-
सारंगास्ते [2]जललवमुचः सूचयिष्यन्ति मार्गम् ॥२२॥

सारंगाश्चातकाः तव मार्गं **सूचयिष्यन्ति** ज्ञापयिष्यन्ति[3] (?) कथयिष्यन्ति वा । **अर्धरूढैर**र्द्ध प्रस्फुटितैः[4] **केसरैः** किञ्जल्कै**र्हरितकपिशं** पिंगलं **नीपं** कदम्बकुसुमं दृष्ट्वा **अनुकच्छं** जलवहुलस्थाने उद्गताक्षकलिकायाः कन्दलीश्च दृष्ट्वा दवदहनदग्धेष्वरण्येष्वाद्यहृष्ट्या अधिकसुरभिरूपं पृथिव्या **गन्धम् आघ्राय** च **तव** कीदृशस्य जललवान् तोयकणान् मुञ्चतीति **जललवमुक्** तस्य । क्विबन्तमिदम् । तथा च जललवलोभाच्चातकास्ते सहायाः स्युरिति भावः । **कन्दली तु लताभेदेऽङ्कुरेऽनूपदेशजे** इति **धरणिः** । **जलप्रायमनूपं स्यात्पुंसि [5]कच्छस्तथाविध इत्यमरः** । नीपादिचिह्नैस्तेषां मार्गज्ञानमिति भावः । **कदम्बे नीपमस्त्रियामित्यमरः** । **सारंगश्चातके भृंगे कुरंगे च मतंगज** इति **विश्वः** । यद्वा सारं मधुरं गायन्तीति **सारंगा** भ्रमरास्तव मार्गमुन्नेष्यन्ति । अर्धोत्फुल्ल-

१. 'तस्मिन्स्थित्वा' का० पा० ।
२. 'तोयोत्सर्गात्' म० सिं०, सा०, स० ती० ।
३. 'निम्नोन्नतो' इति मा० ।
४. 'गजश्यामतया वार्थया' मा० ।
५. 'तीक्ष्णैः' इति पाठा० ।
६. 'खण्ड०' इति पाठा० ।

१. 'दग्धा०' इति पाठा० ।
२. 'नवजल०' इति पा० ।
३. ज्ञास्यन्ति मा० ।
४. 'प्रस्फुल्लैः' इति मा० ।
५. 'गच्छ०' इति मा० ।

किञ्जल्कै [1]र्लक्षितं चिह्नितं कदम्बपुष्पं दृष्ट्वा भ्रमराणां मधुपानार्थं तस्यादरात्सर्वथा विकाशान्मधुनो दुर्लभत्वमतः कदम्बेऽर्धमुकुलम्। तथा सारं वनं जलं वा गच्छन्तीति **सारंगा** हरिणास्ते कन्दलीर्दृष्ट्वा मार्गं सूचयिष्यन्ति। ते हि नवांकुरेच्छा भवन्तीति भावः। आविर्भूतत्वेन कोमलत्वं तासामुक्तम्। तथा सारं वनं गच्छन्तीति सारंगा दन्तिनः, ते हि तादृशं गन्धमाघ्राय मार्गं सूचयिष्यन्ति। तेषां तल्लाभात्। तथा च **रघुः—करीव सिक्तं पृषतैः पयोमुचामित्यादि**। तथा सारं जलं घनं वा गच्छन्ति सारंगाश्चातकाः ते मार्गं सूचयिष्यन्ति। अत्र हेतुगर्भविशेषणम्। जललवत्यागकर्त्तारस्ते, ते हि जलदजलकणार्थिनस्तल्लोभात्। तथा च चत्वारोऽपि सारंगाः स्वस्वेष्टवस्तुलोभात् मार्गकथकाः। अनेन पथा यन्मित्रं मेघो गतः। कथमन्यथास्माकमभीष्टवस्तुलाभ इति मार्गकथनाकारः **जललवमुच** इति सर्वपक्षद्योतकम्। तथा हि अतिवृष्टौ केशरशीर्णत्वं, [2]कन्दल्यत[ल]त्वं, [3][धरा] गन्धरहितत्वम्, चातकपानाद्यसुलभत्वं स्यात्। **सारंगसंकुल-महामालमिति** भाषासमावेशे **भट्टिकाव्ये वृद्धिश्चेत्यग च सारंग** इत्युणादौ। सारंग-स्वप्नसांप्रतमित्युष्मभेदे। **पृषोदरादिकृत** सारंगपदव्युत्पत्तौ [4]दन्त्यादित्वं सारंगपदे निर्णीयत इत्यवधेयम्। **सारो बले जले द्रव्ये रत्नन्याय्ये घनेऽम्बुदे। स्थिरांसे मज्झि सारः स्यादिति मेदिनिकरः** ॥२२॥

अम्भोविन्दुग्रहणचतुरांश्चातकान्वीक्षमाणाः-
श्रेणीभूताः परिगणनया निर्दिशन्तो वलाकाः।
त्वामासाद्य स्तनितसमये मानयिष्यंति सिद्धाः-
सोत्कम्पानि प्रियसहचरीसंभ्रमालिंगितानि ॥२३॥

सिद्धाः प्रियसहचरीणां संभ्रमेण भयेनालिंगितानि **आसाद्य** प्राप्य **त्वां मान-मिष्यन्ति। मान पूजायाम्।** स्वीकरिष्यन्ति वा, धातोरनेकार्थत्वात्। गर्जितकाले सह उत्कम्पेन वर्त्तन्ते सोत्कम्पानि। तथा च त्वद् गभीररवश्रवणम्। भीतप्रियासु यद्ग्रहाश्लेषेण हृष्टाः सिद्धास्त्वामुपकारिणं ज्ञास्यन्तीति भावः। कीदृशाः—जलकण-ग्रहणचपलान् चातकान् पश्यन्तः। **परिगणनया** एकद्वित्र्यादिसंख्यया पंक्तिभूतया वलाकाः कथयन्तः। चातकवीक्षणं वलाकानिर्देशश्च रम्यत्वात्। यद्वा अन्यचित्तीकरण······ तार्थमुत अन्यचित्तता चेति रमणहेतुः। यदाह—

१. 'किंजल्केल्लक्षि०' इति मा०।
२. कन्दलीतलितत्वं मा०।
३. 'गरागन्ध' मा०।
४. 'दन्त्यादितैरसारंगः' इति मा०।

पर्वते नगरे वृक्षे क्वचिद्वा दुःखकारिणि।
निवेशितमनोवृत्तिः श्लाघ्योऽपि रमते चिरम्॥
वेपथु[र्जायते देहे] **नेत्रे मुकुलिते तथा।**
मज्जन्त्या इव देहेषु संश्लेषात्तृप्तिलक्षणम्॥

अन्या अपि मानिन्यो मेघगर्जितभीताः कान्तं मानयन्तीति ध्वनिः। अनेन सिद्धानामपि त्वमेव [संभोगहेतु]र्मादृशां पुनरतिशयेनेत्युक्तम्। **स्तनितं गर्जितमित्यमरः** ॥२३॥

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः-
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।
शुक्लापांगैः सजलनयनैः स्वागतीकृत्य केकाः-
प्रत्युघातः कथमपि भवान् गन्तुमाशु व्यस्येत् ॥२४॥

हे मित्रः मत्प्रियानिमित्तं शीघ्रं **यियासोर्गन्तुमिच्छोरपि** तव **पर्वते पर्वते** प्रति-पर्वतं **कालक्षेपं** विलम्ब**मुत्पश्यामि**। कीदृशि—**ककुभैरर्जुनवृक्षैः सुरभौ** प्रसिद्धे। यद्वा ककुभैरर्जुनपुष्पैः सुगन्धे। भवान् कथमपि मत्प्रियानुरोधेना[शु] शीघ्रं **गन्तु व्यवस्येत्** व्यवसायं कुर्यात्। प्रार्थनायां लिङ्। कीदृशः—शुक्लोऽपांगो नेत्रप्रान्तो येषान्तैर्मयूरैः सानन्दाश्रुभिः **केकाः** स्ववाणीः **स्वागती**[कृत्य सुखेनागत]न्त्वयेति वचनीकृत्य। **प्रत्युद्यातः** कृताभ्युत्थानः। इह ककुभसुरभिगिरीणामतिरम्यतया शुक्लापांगानां दर्शनी-यत्वेन च विलम्बस्तवेति भावः। सजलनेत्रत्वेन चिरागते मित्रे आनन्दाश्रु [वर्षणं] युक्तम्। अन्योऽपि सानन्दाश्रुणा मित्रेण कृताभ्युत्थानात् अविलम्बितः कार्यवशाद् गन्तुं व्यवस्यतीति ध्वनिः। मयूराः मेघालोके [1]जाते सति अश्रूणि वर्षन्ति नदन्ति च। प्रमत्ता (भवन्ति) इति प्रसिद्धिः **पर्वत** इत्यत्र वीप्सायां द्वित्वम् **इन्द्रद्रुः ककुभोऽर्जुन** इत्यमरः। **शुक्लापांग**पदेन विशेषणद्वारा विशेषप्रतिपत्तिः इति न्यायेन मयूर उच्यते। **केका वाणी मयूरस्येत्मरः** ॥२४॥

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहवलिभुजामाकुलग्रामचैत्याः।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः-
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥२५॥

१. 'मयूराः मेघालोकजातदर्श्याऽश्रुणि०' इति मा०।

दश अर्णांसि जलभूम [यो] मेषु ते **दशार्णा** देशभेदाः। **पृषोदरादित्वात्** साधुः। **त्वयि** सन्निहिते सति एतादृशाः **संपत्स्यन्ते** भविष्यन्ति। कीदृशाः—**सूचिः** सीवनद्रव्यम्, तद्वद्भिन्नैः विकसितैः। यद्वा **सूचिभिन्नैः** सूचिकाग्रभिन्नैः। यद्वा कोरकदशायां केतकी पुष्पसंस्थानसूचिस्तस्यां भिन्नैर्विकशितैः केतकीपुष्पैः पाण्डुच्छायानामुपवनानाँ वृत्तिर्वेष्टनम्। कण्टकितकेतकीवृक्षै रक्षार्थं वेष्टनं क्रियते। अनेन देशानां सुरतविलासयोग्यतोक्ता। गृहं गृहिणी तद्दत्तं वलिमुपकारं ये भुञ्जते तेः काकाः[1]। अत एव गृहस्थानां तेषां नीडारम्भे पक्षिगृहे करणोपक्रमे तैरेव वकादिकुलायै**राकुलानि** व्याप्तानि ग्रामचैत्याद्युद्देशपादपा येषु ते। अनेन वकादयोऽपि गृहिणीसुखवन्तः स्युरित्युक्तम्। फलानां परिपाकेन श्यामा जम्बूवनस्यान्ताः स्वरूपाणि पर्यन्ता वा येषु ते। अत एव मानसगमनोत्सुकतया कतिपयदिनं स्थातुं शीलं येषां तथाभूता हंसा येषु ते मेघदर्शनेऽपि श्यामजम्बूभ्रमेण कियद्दिनस्थायिनः पश्चाद्गर्जितेन मेघनिश्चयान्मानसं हंसा यास्यन्तीति भावः। तदिह वर्षास्वरूपमुक्तम्। देशानां वामवत्त्वमतिकेतकवत्त्वमत एव रम्यत्वमप्युक्तम्। **वेष्टने वरणे वृत्तिरिति विश्वः। सूची तु सीवनद्रव्येऽग्रेऽपि च निगद्यत** इति धरणिः। **कुलायो नीडमस्त्रियामित्यमरः। वलिः पूजोपहारयोरिति शाश्वतः। वलिभुग्वायसा अपीत्यमरः। जिनदेवालये चैत्यं चैत्युमुद्देश्यपादप इत्युत्पलिनी।** अतएव काकगृहारम्भाकुलानि ग्रामेषु चैत्यानि बौद्धदेवतागृहाणि ये ते इति व्याख्या। **अन्तः प्रान्ते स्वरुपेऽपीति विश्वः। गृहं कलत्रेऽपि संवलीति मेदिनिकरः** ॥२५॥

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः [2]फलमतिमहत्कामुकत्वस्य [3]लब्ध्वा।
तीरोपान्तस्तनितसुभगंपास्यसि [4]स्वादु यस्मा-
त्सभ्रूभंगं मुखमिव पयो [5]वेत्रवत्याश्चलोर्मि ॥२६॥

वेत्रवत्यभिधानायाः नद्याः **पयो** जलं **पास्यसि**। स्वादयुक्तं मधुरं **चलोर्मि** चलतरंगञ्च। अत एव **सभ्रूभंगं** भ्रुकुटीसहितमुखमिव, तरलकपोलत्वात्। किं कृत्वा **दिक्षु प्रथितं** ख्यातं **विदिशेति लक्षणं** नाम यस्यास्ताम्, तेषां दशार्णानां **राजधानीं** पुरीं गत्वा **सद्यः** गमनकाल एव **कामुकत्वस्य** कामितया **अतिमहत्फलं** कलावतीविलोकनं **लब्ध्वा** च। **तीरोपान्ते** तटनिकटे गर्जितमनोहरं यथा तथा पास्यसीत्यर्थः। पयोविशेषणं वा। तदिह वेत्रवत्या नायिकात्वं ध्वनितम्। नायिकाया अपि प्रणयकलहेन चुम्बनकाले

१. 'भुञ्जते वका काकाः' इति मा०।
२. 'फलमविकलम्' इति पाठा०।
३. 'लब्धा' इति पाठा०।
४. 'स्वादु यत्तत्' इति पाठा०।
५. 'चलोर्म्कीः' इति पाठा०।

भ्रूभंगवन्मुखं पारावतादिकूजितमनोहरं स्वादयुक्तं मधुराधरामृतसहितं नायकः पिबतीति ध्वनिः पानमिह चुम्बनमेव। अथ च वेत्रवत्या अन्तः पुरचारिण्याः **स्तनितसुभगं** कण्ठकूजितमनोज्ञं [1]पास्यसीत्युक्तिश्लेषः। **प्रतीहार्या वेत्रवती प्रेष्यान्तःपुरचारिणीत्यमरमाला**। राजा धीयतेऽस्यामिति राजधानी। **लब्धेति** पाठे फलं लब्धा सन्निति योज्यम्। ताच्छील्ये [2]णिनिः। 'स्वादुयुक्तं' इति पाठे **स्वादु** मधुरं युक्तं योज्मम् ॥२६॥

नीचैराख्यं गिरिमधिवसेस्तत्र [3]विश्रामहेतो-
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥२७॥

तत्र विदिशायां **नीचैराख्यं** नीचैर्नामानं **खर्वपर्वतमिति** प्रसिद्धं [4]शैलं विश्रामनिमित्तम् **अधिवसेः** तत्र स्थास्यसि। **उपान्वध्याङ्वस** इत्यधिकरणस्य कर्मत्वम्। इहाख्यापदेन **नीचै**रिति नाममात्रं न तु नीच एव शैलः स इति तद्वासयोग्यता ध्वन्यते। कीदृशम्—विकशितपुष्पैः कदम्बवृक्षैः त्वत्संयोगात्पु**लकितमिव** रोमाञ्चितमिव। तथा च प्रीतः सन् स त्वां धारयिष्यतीति भावः। **यः** शैलः **पण्यस्त्री**णां वेश्यानां रतिपरिमलः संभोगविमर्दोत्थगन्धस्त**दुद्गारिभि**स्तदभिव्यञ्जनैः पाषाणगृहैः **नागराणां** विलासिनां यौवनान्युद्दामानि **प्रथयति** उद्भानि ख्यापयति। तरुणानामहमेव विनोदस्थानमिति बहलपरिमलमिलनेनायं कथयतीति भावः। अनेनाधिवासयोग्यतोक्ता। **हेतो**रित्यत्र **षष्ठी हेतुप्रयोग** इति कर्मणि षष्ठी। **पण्यस्त्री गणिका वेश्येत्यमरः। विमर्दोत्थे परिमलो गन्धे जनमनोहर** इति च **उद्गारिभि**रित्यत्र **बहुलमाभीक्ष्ण्य** इति णिनिः ॥२७॥

विश्रान्तः सन् व्रज [5]नवनदीतीरजातानि [6]सिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां-
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥२८॥

१. 'पश्यसी' इति मा०।
२. तृण० मा०।
३. 'विश्रान्ति०' इति पाठा०।
४. 'नैनं' इति मा०।
५. वननदी० सल्लि०; नगनदी इति पाठा०।
६. 'तीरजानां निषिञ्चन्' इति पाठा०।

तत्र गिरौ: **विश्रान्तः** परिश्रमहीनः [सन्] **व्रज** अग्रे गमिष्यसि। किं कुर्वन्—**नवानि** च तानि **नदीतीरजातानि** चेति समासः। यद्वा **नवनदी** नदीभेदः, तत्तीरजातानि **यूथिकजालकानि** पुष्पभेदाल्पकणिकाः **नवजलकणैः सिञ्चन्** अभ्युक्षन्। कीदृशः—पुष्पं लुनन्ति चिन्वन्तीति **पुष्पलाव्यः** मालाकारिण्यस्तद्वदनानां क्षणपरिचितो मुहूर्त्तमनुभूतः, प्रीत्या समालोकित इति यावत्। **छायादानात्** आतपाभावकरणात्, कीदृशानां कपोल-घर्मस्फोटनपीडाम्लानकर्णावतंसानाम्। आतपसंव[न्धात्] पुनः पुनः कपोलस्वेदापनयनेन क्लम इत्यर्थः। तथा च तत्र सुन्दरीणां सानन्दमुखारविन्दलोकनपाततया नागरत्वं ते स्यादिति भावः। अन्योऽपि नागरश्छायादानादुत्कण्ठादानान्नागरीणां क्षणपरिचितो भवतीति ध्वनिः। **क्षारकं जालकं क्लीबे कलिकेत्यमरः। रुजेति भिदादित्वादङ्।** **छाया अनातप उत्कोचेति धरणिः।** क्षणं परिचितः क्षणपरिचितः। **सुप्सुपेति** समासः। पुष्पं लुनन्तीति पुष्पलाव्यः। **कर्मण्यण** ॥२८॥

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां-
सौधोत्संगप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
[1]विद्युद्दामस्फुरणचकितैस्तत्र पौरांगनानां-
लोलापांगैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥२९॥

उत्तरा [शा]मुदीचीं दिशं **[प्रस्थितस्य]** चलितस्य **भवतः** यद्यप्युज्जयिनीगमने **वक्रो**ऽनृजुः **पन्थाः** मार्गः तथापि **उज्जयिन्याः** [2]नगर्याः **सौधोत्संगप्रणयविमुखः** प्रासाद-क्रोडानुरागपराङ्मुखो[3] **मा भूः** न भविष्यसि। **उत्संगः** क्रोड ऊर्ध्वसंगश्च। तथा च त्वदावासयोग्यमुत्तुंगन्तदपहाय [4]न] गमिष्यसीति भावः। यः पूर्वापेक्षया समुच्चयो अपथेनापि गमने कार्यमाह—**तत्र** उज्जयिनी सौधेषु पुरसुन्दरीणां [5]**विद्युद्दाम्नस्त**[डि]द्गुणस्य **स्फुरणेन** द्योतनेन **चकितैः** संभ्रान्तैरत एव **लोलापांगै**रितस्ततः प्रसारितपर्यन्तै **र्लोचनैर्यदि न रमसे** न क्रीडसि तदा **वञ्चितोऽसि**। विधिनेति शेषः। तथा च जन्म-साफल्यार्थं भवता तत्रावश्यं गन्तव्यमिति भावः। **प्रस्थित** इत्यत्र **गत्यर्थाकर्मकेत्यादिना** कर्त्तरि क्तः। **प्रस्थानं गमनं गम** इत्यमरः। **यदपीत्यत्र** यच्छब्दो यद्यर्थे। **ऊर्ध्वसंगे च मध्ये च उत्संग** इति **विश्वः मा भूरित्यत्र न माङ्योग** [6]इत्यटो निषेधः। स्फुरणमिति **कुटादित्वाद्गुणनिषेधः। चकितमिति।**

१. स्फुरित० मल्लि०।
२. 'नागर्याः' इति मा०।
३. 'पराङ्मुखश्च' इति मा०।
४. मा मा०।
५. तणिद्० मा०।
६. 'इत्यङ्निषेधः' इति मा०।

दूरादपांगविन्यस्तं सन्निधाने विकुञ्चितम्।
प्रतिनेत्रनिपाते तु चकितं चक्षुरिंगितम्॥ इति **भरतः**।
रमसइत्यत्रानुपसर्गार्थेऽपि तङ् ॥२९॥

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः-
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।
निर्विन्ध्यायाः पथि भव [1]रसाभ्यन्तरं सन्निपत्य-
स्त्रीणामाद्यं [2]प्रणयवचनं विभ्रमो हि प्रियेषु ॥३०॥

त्वं निर्विन्ध्याया नद्याः **पथि** मार्गे भव। **रसाभ्यन्तरं** जलमध्यं **सन्निपत्य** प्रविश्य। यद्वा निर्विन्ध्यायाः **रसाभ्यन्तरं** जलाभ्यन्तरं भव। **सन्निपत्य** संनिकर्षीभूय पथि वर्त्मनि। अथ च **रसो**ऽनुरागः तदभ्यन्तरं भव, रसज्ञो भवेत्यर्थः। **सन्निपत्य** तन्मयीभूय। यद्वा निर्विन्ध्याया मध्यं प्रति **सन्निपत्य** गत्वा **पथि रस** शब्दं कुरु। **रसाभ्यन्तर** इति पाठे रसो जलं शृंगारश्चाभ्यन्तरे यस्य सः। कीदृश्याः **वाचिक्षोभेन** कल्लोलचलनेन **स्तनिताः** कृतशब्दा **विहगश्रेणिः** पक्षिपंक्तिरेव **काञ्चीगुणो** रसना यस्याः [तथाभूतायाः]। मध्ये शिलादिषु जलप्रतिबन्धेन **स्खलित**मनोहरं यथा तथा **संसर्पन्त्या** गच्छन्त्याः। इह 'सम्' पदेन सानुरागं गमनमाह। **दर्शिता आवर्तनाभिर्यया।** एतेन तस्या नायिकात्वमुक्तम्। नायिकापि नायकदर्शनेन पदस्खलनमनोज्ञं याति। अत एव रसितरसना दर्शितनाभिश्च भवति। तद्वचनं विना तत्संगमहं कथं करिष्यामीत्यत आह—यतः **स्त्रीणां विभ्रमो** नाभीदर्शनादिरूपा चेष्टा प्रियविषये **प्रणयि** प्रेमान्वितं वचनमाद्यं भवति। कामिनीनां विभ्रम एव मनोऽनुरागकथनमाद्यं वचो भवतीत्यर्थः। तथा च [न] तद्वचनापेक्षेति भावः। इयं नायिका कुलजा। यदाह—

[3]चलत्तृणेऽपि सातंका कम्पितांगी पदे पदे।
त्यक्तालंकारमञ्जीर [सलज्जा] कुलजापि सा॥

अत एव–**वाहुमूलं स्तनं नाभीमूरुमूलञ्च मेखलाम्।**
व्याजतो दर्शयेद्यत्र [4]रागोऽसौ विभ्रमो मतः॥

नाभीदर्शनादिकं रतोत्सुकतासूचकम्। यदाह—

नीवीमोचनबन्धो मुहुर्मुहुर्जृम्भया च संश्लेषः।
स्वाधरदानग्रहणं कालक (?) परिचुम्बकं रतोत्सुकता॥

१. 'रसाभ्यन्तरः' इति पाठा०।
२. 'प्रणयि०' सारो०।
३. 'चलत्रिणे' इति मा०।
४. 'रामोसौ' इति मा०।

आवर्त्तोऽम्भसां भ्रम इत्यमरः। रसोऽनुरागे पानीये शृंगारादौ [1]द्रवेऽपि चेति विश्वः ॥३०॥

वेणीभूतप्रतनुसलिला[2] तामतीतस्य सिन्धुः-
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः[3]।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती-
कार्श्यं येन त्यजति विधिना सत्वयैवोपपाद्यः ॥३१॥

हे **सुभग ? येन विधिना** व्यापारेण **कार्श्यं** कृशत्वं सा **सिन्धुर्न्नदी** निर्विन्ध्या **त्यजति** स विधिस्त्वया **उपपाद्यः** कर्त्तव्यः वर्षणेन पूरणात्। कीदृशी **ते** तव कृते **सौभाग्यं** निजानुरागं त्वद्वियोगाशयं[4] कृशत्वाद्**व्यञ्जयन्ती** प्रकाशयन्ती। **वेणीभूत** वेणीरूपं **प्रतनु** स्वल्पं **सलिलं** यस्याः सा आतपशोषेणाल्पीभूतज[ल] मेव वेणीतुल्यमिति भावः। तटरुहास्तीरजाता ये तरवस्तेभ्यो भ्रंशिभिः पतितैः शीर्णपत्रैः पाण्डुच्छाया पाण्डुरकान्तिश्च। अनेन तस्य विरहिणीत्वमुक्तम्। तामेव सिन्धुमतीतस्य अतिक्रम्य गच्छतः। यद्वा **तां** निर्विन्ध्यामतीतस्य तव, सिन्धुर्न्नदीभेदो येन (कार्श्यं त्यजतीति योजना)। वर्षोपगमे सुभगेत्यनुरागोचितं विशेषणम्। तदिह नद्या नायिकात्वं मेघस्य नायकत्वं चाभिप्रेतम्। तथा च भर्तृविरहे कृशत्वमल्पजलता, मेघे [5]भर्त्तरि जलं वर्षति[तत्]त्यजतीत्युचितमेव। अन्यापि विरहिणी सवेणीबन्धा पाण्डुच्छविः कृशा च [6]प्रियसौभाग्यं कृशत्वादेव प्रकटयन्ती भवति। ताञ्च प्रियतमो यथेष्टरतिलीलया मांसली करोतीति ध्वनिः। वेणीबन्धादिकं विरहे कर्त्तव्यम्। यदाह—

पाण्डुच्छाया कृशतनुर्वेणीकृतशिरोरुहा।
लम्बालकाम्लानरेखा विभूषणविवर्जिता॥

तथा च— **निद्राच्छेदांगदौर्बल्यं पाण्डुता बलहानिता।**
संतापो दीर्घनिःश्वासः स्त्रीपुंसोर्विरहे समाः॥

भ्रंशीति ताच्छीलिको णिनिः। कृशस्य भावः कार्श्यम् ॥३१॥

---

१. द्रव्ये० इति मा०।
२. सलिलासार० मल्लि०, सात्वती० स० ती०।
३. 'शीर्णपर्णैः' वल्ल०, विल्स०।
४. शया० इति मा०।
५. 'भर्त्तृ' इति मा०।
६. प्रिये० इति मा०।

प्राप्यावन्ती[1]मुदयनकथाकोविदग्रामवृद्धां-
पूर्वोद्दिष्टामनुसर[2] पुरीं श्रीविशालां विशालाम्।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां-
शेषैः [3]पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥३२॥

अवन्तीं प्राप्य पूर्वोद्दिष्टां पूर्वश्लोककथितां **विशाला**मुज्जयिनीं **पुरी**म**नुसर** गमिष्यसि। प्रार्थने आशंसायां वा लोट्। **श्रिया** संपत्त्या शोभया वा **विशालां** महतीं अवन्तीम्। कीदृशीम्—**उदयनो** वत्सराजो नाम राजभेदः पूर्वमवन्तीपतिरासीत्, तस्य **कथायां कोविदाः** पण्डिताः कुशला वा ग्रामीणवृद्धजना यत्र ताम्। ग्रामीणवृद्धजनानानीय नागराः पूर्वकथां तद्द्वारा शृण्वन्तीति परिपाटिः। तदर्थं ग्रामग्रहणम्। यद्वा **ग्रामे**षु स्वरभेदेषु **वृद्धा** विज्ञा[4] **ग्रामवृद्धाः**। उदयनकथाकुशला ग्रामवृद्धा यत्र। तथा च कथाकौशलञ्च तेषामुक्तम्। यद्वा उदयनकथाकोविदानां **ग्रामाः** समूहा **वृद्धाः** प्रामाणिका जीर्णा वा यत्र ताम्। **विशाला[त्विन्द्र]वारुण्यामुज्जयिन्यान्तु योषितीति मेदिनिकरः। ग्रामः संवसथे स्वरे** इति च। **वृद्धः प्रामाणिके जीर्णे वृद्धेऽपि [च] निगद्यते** इति च। कश्चित्तु विशाला**वन्त्योः** पर्यायत्वेन **ग्राम**पदवैयर्थ्येन चावन्ती[5]-नदींजलदानं प्रापय्य **विशाला**मुज्जयिनीमनुसरेति योजयति। कीदृशान्—उदयनकथायां कोविदा। ग्रामीणवृद्धा येषु तान्। **सन् सुधीः कोविदो बुध** इत्यमरः। **सुचरितं** पुण्यं तस्य फले स्वर्गे भोगात् स्वल्पीभूते सति स्वर्गिजनानां **गां** पृथिवीं गतानां भोक्तव्यपुण्यशेषै**र्दिवः** स्वर्गात् **हृत**मानीतं **कान्तिम**दद्भुतशोभायुक्त**मेकं**[6] **खण्डमिव**। अजहल्लिगतया अवन्त्युज्जयिन्योर्विशेषणमिदम्। तथा च स्वर्गतुल्यजनशालिविलासदर्शनायापि त्वया नित्यं गन्तव्यमिति भावः। **खण्ड**मित्यत्र भिन्ने लिंगेऽपि नोपमादूषणं धीमतामनुद्वेगात् अजहल्लिगतयैव तदुन्नयनात् ॥३२॥

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां-
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमंगानुकूलः-
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥३३॥

---

१. नुदयन० इति पाठा०।
२. उपसर इति पाठा०।
३. कृत० का० पा०।
४. विज्ञो इति मा०।
५. चावयन्तीनजलदानप्राप्य इति मा।
६. मेवं इति मा०।

यत्रोज्जयिन्यां [शि] प्रानामधेयाया नद्याः संबन्धवायुः कामिनीनां **सुरतग्लानिं** [1]संभोगायासं हरति (तामनुसरेति पूर्वोक्तेनान्वयः)। कीदृशः-**सारसपक्षिणां कूजितं** शब्दितं पटुना मदेन कलमव्यक्तमधुरं **दीर्घीकुर्वन्** वर्धयन्। शीतवातसंगिनः सारसाः कामवशेनात्यर्थं [2]श्वसन्तीति प्रसिद्धिः। **प्रत्यूषेषु** प्रभातेषु विकशितपद्मसौरभसंबन्धेन **कषायः** सुरभिः अनेन वातस्य शैत्यसौगन्ध्ये उक्ते। **अंगे** शरीरे अनुकूलः सुखदः। अनेनाल्पतोक्ता, महावातस्य दुःखदत्वात्। प्रार्थनायामायासाद्यपनाय वायुवहनयाचनायां चाटुकारी सुखदः। अत एव **प्रियतम इव** वल्लभसमः। सोऽपि सुरतस्य प्रार्थनायां चाटुकारः प्रियकारी, सुरतजनितखेदापनयनात्। रतान्ते सारसरवकारी **स्फुटित-कमलो** व्यक्तलक्ष्मीकः। **आमोदानामांगरागपरिमलानां मैत्र्या** [3]संपर्केण सुरभिश्च भवति। अनयोः समासः। **हारीतपारावतसारसानां नादं विदध्यात्सुरतावसान** इति **भरतः**। कामी चांगानुकूलादगुरुसंवाहनात्[4]। अत एव खेदहारी। यद्वा **आमोदानां** सुगन्धानां **मैत्र्या** संपर्केण **कषायो** अंगरागवान् नायकः **कषायः सौरभे ख्यातोऽङ्गरागे विलेपने** इति **विश्वः**। [5]**कषाय** इत्यत्र अर्श आद्यच् मत्वर्थीयः। **प्रत्यूषोऽहर्मुखमित्य-मरः। कमला श्रीर्हरिप्रियेति** च ॥३३॥

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै[6]-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः[7]।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं[8] हि लुप्त्वा- (खिन्नान्तरात्मा)
लक्ष्मीं[9] पश्यंल्ललितवनितापादरागांकितेषु ॥३४॥
भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः-
पुण्यं मायास्त्रिभुवनगुरोर्धाम चण्डेश्वरस्य[10]।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
[11]स्तोपक्रीडाविरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥३५॥

१. 'तव संभोगायासं' इति मा०।
२. स्वस्वन्ती० इति मा०।
३. 'सचोक्र्केण' इति मा०।
४. गुरुसंप्राहणात् मा०।
५. 'करवाय' इति मा०।
६. 'धूमैः' सु० वि०।
७. 'नृत्तोपचारः' का० पा०।
८. 'खेदं नयेथाः' इति कृ० पाठा०।
९. 'मुक्त्वा खेदं' वल्ल०, 'खेदं नीत्वा' सारो०, सु० वि०; 'त्यक्त्वा खेदं' विल्स०।
१०. चण्डी० इति पाठा०।
११. निरत० इति पाठा०।

अस्या उज्जयिन्या **हर्म्येषु** सौधेषु [अध्व] खेदमध्वपरिश्रमं **लुप्त्वा** त्यक्त्वा चण्डेश्वरनाम्नः शिवस्य **धाम** गृहं मा याः गमिष्यसीत्युत्तरेण युग्मकम्। तत्र गमनं पुण्यार्थम्। कीदृशः-**जालोद्गीर्णै**र्गवाक्षनिर्गतैः **केशसंस्कारधूपैः** नायिकाकेशवासाय कालागुरुप्रभृतिधूपैर्मांसलशरीरः। धूपसंबन्धेन मेघोपचयात्, **बन्धुप्रीत्या** मित्रार्थी रागेन गृहमयूरैर्दत्तो नृत्यरूप **उपहार** उपढौकनं यस्य सः। तथा च परिमलमिलनाय नृत्य-दर्शनाय च त्वया तत्र स्थातव्यमिति भावः। कीदृशेषु-कुसुमै रचितपुष्पैः सुगन्धेषु ललितानां विलसितानां **पादरागैः** पददत्तमहारजनरागैः चिह्नितेषु। अनेन स्थानस्य रम्यत्वमुक्तमतोऽपि ते गमनमावश्यकमिति भावः। त्वं कीदृशः **अध्वनि** पथि **खिन्न** आयासित अन्तरात्मा यस्य सः। तथा च भर्त्तुरीश्वरस्य कण्ठच्छविरेष इति हेतोः **गणैर्नन्दि**प्रभृतिभिः सादरं यथा तथा दृश्यमानः। तथा च नीलकण्ठकण्ठतुल्यतया तेषा-मादरपात्रं भूया इत्यपि तत्र गमने फलं तवेति भावः। **भर्त्तु**रित्यत्र विशेषात् जगत एव तेषां वा संबन्धः। कीदृशस्य-त्रीणि च तानि भुवनानि च **त्रिभुवनानि** तेषां **गुरोः** श्रुतिद्वारोपदेशकस्य तथा च जगद्गुरोः पवित्रगृहगमनमावश्यकमिति भावः। त्रयाणां भुवनानां समाहार इति विग्रहे **त्रिभुवनी**ति स्यादित्यवधेयम्। ङीप्विधेरनित्यत्वमिति वा। तद्गृहपरिचयार्थमाह-**गन्धवती** नाम नदी तस्या मरुद्भिर्वातैः कम्पितोपवनम्। कीदृशैः-नीलोत्पलानां रजेन परागेण सुगन्धिभिः। **तोयक्रीडायामविरतं** निरन्तरं यद् **युवतिस्नानं** तेन धौततदंगरागपरिमलेन **तिक्तैः** सुगन्धिभिः। यद्वा तोयक्रीडायामविरता असक्ता या युवतयस्तासां **स्नानेन** स्नानीयांगरागेण **तिक्तैः**। तथा च नानागन्धसंबन्धाद् **गन्धवती**त्युक्तम्, भूम्नि मतुब्विधानात्। [1]वहलपरिमलमिलनं तत्र ते स्यादित्युक्तम्। अरण्यशिखिनां तत्रासत्त्वात्काम्यकुशलत्वाद्वा भवनपदम्। कण्ठस्य छविर्यस्य। सापेक्ष-त्वेऽपि गमकत्वात् समासः। **यायाः** इति **या प्रापणे** लिङ्। **धाम देहे गृहे रश्माविति मेदिनिकरः। स्नानीयेऽभिषवे स्नान**मिति विश्वः ॥३४-३५॥

अप्यन्यस्मिन् जलधरः महाकालमासाद्य काले-
स्थातव्यं ते नयनविषयं यावदभ्येति[2] भानुः।
कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥३६॥

हे **जलधर,** मेघ! **महाकालं** कालाग्निरुद्रमासाद्य सन्निधीकृत्या**न्यस्मिन्नपि काले** संध्याभिन्नेऽपि समये तावत्ते त्वया स्थातव्यं यावत् सूर्यो नयनविषयं यथा तथा **अभ्येति** उदयति। उदयपर्यन्तं त्वया तत्र स्थातव्यमिति भावः। यद्वा याव**द्भानु**श्चक्षुर्विषय-**मभ्येति** गच्छति। प्रभातपर्यन्तमित्यर्थः। तावत्कालावस्थाने फलमाह–**शूलिनः** शिवस्य

१. अवहल० इति मा०।
२. 'दत्येति' इति पाठा०।

[1]श्लाध्यां संध्याकाले **वलिपटहतां** पूजाढक्कात्वं **कुर्वन्** **आमन्द्राणां** महागभीराणां गर्जितानाम**विकलं** संपूर्णं **फलं** प्रयोजनं **लप्स्यसे** प्राप्स्यसि। तथा च प्रातः शिवालये पटहत्वं ते, अतः शिवाराधनजं पुण्यं ते स्यादिति भावः, अकस्मादेव पटपटनादस्य कृतत्वात् श्लाघनीयत्वमुक्तम् **ते** इत्यत्र **कृत्यानां कर्त्तरिवेति** षष्ठी। **आनकः पटहो ढक्का इत्यमरमाला**। यद्वा **संध्यावलि** [वृषो]त्सर्गस्तद्वाद्यताम् **ये शिवायतनोत्सृष्टास्ते सन्ध्यावलयो वृषा** इति **हारावली** ॥३६॥

[2]पादन्यासक्वणितरशनास्तत्र लीलावधूतै-
[3]रत्नच्छायाखचितवलिभिश्चामरैः [4]कान्तहस्ताः।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रविन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥३७॥

तत्र महाकालालये तदुपचारिका **वेश्या** **नखपदसुखान्** नखक्षतसुखकारकान् **वर्षाग्रविन्दून्** वर्षाकालीनाद्यजलकणान् **त्वत्तो** मेघात् प्राप्य **मधु[क]रश्रेणिदीर्घान्** भ्रमरपंक्तिवद्विस्तीर्णान् कटाक्षान् **त्वयि** मेघे [5]**आमोक्ष्यन्ते**। तथा च रतिकालवृत्तनखक्षतसुखदतया तासां प्रीतो भविष्यसीत्याशयः। **मधुकरेत्येन** कटाक्षाणां नीलत्वचलत्वे उक्ते। अलिपक्षसपक्षमप्युक्तम्। कीदृश्यः—**पादन्यासैश्**चरणसंचरणैः **क्वणिताः** सशब्दा **रसनाः** क्षुद्रघण्टिका यासां ताः। एतेन नृत्यपरनायिकाश्रमहारकत्वेन सुभगत्वं पुण्यवत्त्वञ्चोक्तम्। **लीलया** विलासेन चालितैः रत्नानां **छाया** कान्तिः पंक्तिवर्ता तया **खचितः** संवद्धो **वलिश्**चामरदण्डो येषां तैश्चामरैः क्लिन्नकराः। अनेन तासां सुकुमारत्वमुक्तम्। तथा च तदुपकारेण पुण्यवत्त्वश्रृंगारित्वे दर्शिते। **नृत्येषु चरणक्षेपं पादन्यासं विदुर्बुधा** इति **हारावली**। **काञ्ची दाम निवेशन इत्यमरः**। [6]**लीलां विदुष्केलिविलासहेला श्रृंगारभावप्रभवक्रियास्विति** भरतः। **छाया कान्तिः सच्छोभा [पं] क्तिषु स्त्रियामिति मेदिनिकरः**। **वलिश्चामरदण्डे स्यादिति शाश्वतः**। आमुचो अनेकार्थतया त्यागेऽपि प्रयोग इत्यवधेयम्। कटाक्षो नेत्रप्रान्तसञ्चारी कामोद्दीपको नेत्ररश्मिभागः ॥३७॥

१. शिवस्य तस्य इति मा०।
२. 'पादन्यासैः इति क्र०।
३. 'रचित०' इति पाठा०।
४. क्लान्त० इति पाठा०।
५. 'मोक्ष्यन्ति' इति मा०।
६. 'नीलां' इति मा०।

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः-
सान्ध्यं तेजः प्रतिनव[1]जपापुष्परक्तं दधानः।
[2]नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां-
[3]शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥३८॥

पशुपतेः शिवस्य नृत्योपक्रमे **आर्द्रनागाजिनेच्छां** सरसकरिचर्मलाभाभिलाषं **हर** अपनय। **पश्चात्** कीदृशः—हरस्यैव उच्चैरुत्तुंगा ये भुजास्त एव **तरुवनं** वृक्षसमूहः **तन्मण्डलेनात्मबिम्बेनाभिलीन** आश्रितः। **प्रतिनवं** प्रत्यग्रं **यज्जपापुष्पमोड्रपुष्पं** तद्वल्लोहितं सन्ध्याकालीनं तेजो **दधानः**। तथा च श्यामरक्तस्य मण्डलाकारेण भुजमध्यगतस्य तव लाभात्तस्य तादृशेच्छाविच्छेद इति भावः। हरस्य नृत्यपरतया कथं भक्तिज्ञानमत आह—गौर्या **दृष्टभक्तिस्त्वम्**। सा स्त्री त्वामपूर्वं दृष्ट्वा बिभेति चेत्तदपि ने यत आह—**शान्तोद्वेगत्वेन** स्निग्धनेत्रं यथा तथा **दृष्टभक्तिरित्यर्थः**। नवगजाजिनेच्छुरुग्रः। यदि मत्पुत्रस्य गजाननस्याजिनमुत्कृत्य गृह्णाति तदा किं स्यादिति शंकयोद्वेगः। त्वयि तादृशि प्राप्ते तदुपशमः यद्वा हरस्योपकारकोऽयमपूर्व इत्युद्वेगस्य त्वद्भक्तिदर्शने शान्तिः। यद्वा कृत्यर्थं वा हरस्य, तल्लाभः कुत्रेति चिन्तयोद्वेगस्तव तादृशस्याकस्माल्लाभे तच्छान्तिः यद्वा हे **शान्तोद्वेगः** गताध्वश्रमतदपनयप्रकारस्य कथनात्। यद्वा हे **शान्त** शान्तियुक्त, हराराधनात्। हे तद्वेग (?) उर्ध्ववेगः तथा च शीघ्रं त्वया गन्तव्यमिति भावः। मेघस्यैवेदं विशेषणम्। **तरुवनेत्यत्र** वनपदेन बहुत्वमुक्तम्। आर्द्रं करिचर्म धृत्वा हरः संध्यायां नृत्यतीत्यागमः। [4]**अभिलीन** इति लीयते कर्त्तरि क्तः। **आदय उदितश्चेति** तस्य नत्वम्। हरेति प्रार्थने लोट्। आर्द्रपदेनाजिनस्य रक्तत्वमुक्तम् ॥३८॥

गच्छन्तीनां रमणवसतिं योषितां तत्र [5]नक्तं-
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामिन्या कनकनिकषस्निग्धया[6] दर्शयोर्वी-
तोयोत्सर्गस्तनितमुखरो मा [7]च भूर्विक्लवास्ताः ॥३९॥

१. जवा—क्र०।
२. 'नृत्तारम्भे' इति पाठा०।
३. शान्तोद्वेगः—क्र०
४. 'अभिनील' इति मा०।
५. रात्रौ विलस०।
६. च्छायया विलस०।
७. स्म मल्लि०, क्र० प्रभृतयः।

उज्जयिन्यां **नक्तं** रात्रौ **रमणवसतिं** कान्तगृहं **गच्छन्तीनां योषितामभिसारि-** काणां कृते **उर्वीं** भूमिं **दर्शय** । **सौदामिन्या** विद्युता करणभूतया **कनकनिकषवत्** स्वर्णकषणलेखावत् **स्निग्धया** । अनेन मेघस्य कषपाषाणसाम्यमुक्तम् । सूचिकाविदारणयोग्यैरन्धकारै **रुद्धालोक** अपगतचाक्षुषज्ञाने **नरपतिपथे** राजमार्गे सति । राजमार्गस्य सततपरिशीलनेन क्षुण्णत्वेनातिविस्तीर्णतया च । तादृशि नभसि गमनरोधार्थं तदुपन्यासः । सूचिभेद्यत्वेन तमसोऽतिघनत्वमुक्तस्य स्थूलद्रव्यस्याप्रवेशात् । अत एवाधिकार्थवचनतया **सूचीभेद्यैरि**त्यत्र **कृत्यैरधिकार्थवचने** इति समासः । **तोयोत्सर्गस्तनिता-**भ्यां वृष्टिगर्जिताभ्यां **मुखरो** दुर्जनः स शब्दो **मा भूः** न च भविष्यसि । [1]तदुभयं मा कार्षीरित्यर्थः । यतो **विक्लवा** विह्वलास्ता भवेयुः । सहजभीरूणां तासां वृष्टिगर्जिताभ्यां नोद्वेजकः [भवः] [2]तेनचोपकारक एव स्या इति भावः । **कान्तार्थिनी तु या याति संकेतं साभिसारिकेत्यमरः** । **आलोको दर्शनोद्योताविति** च । **तडित्सौदामिनि विद्युदिति** च । **कच्छपट्टगता लेखा निकषाः कथ्यते** बुधैरिति शाश्वतः ॥३९॥

तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां-

नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।

दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं-

मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥४०॥

कस्याञ्चिद्भवनवलभौ गृहोपरिकुट्यां निद्राणकपोतायां **तां रात्रिं नीत्वा** अतिवाह्य सूर्योदये **भवान् पुनरप्यध्वशेषं वाहयेत्** अतिक्रामेत् । कीदृशं-**खिन्नं** श्रान्तं विद्युदेव कलत्रं वधूर्यस्य सः । **चिरविलसनात्** चिरस्फुरणात् हेतोः । इह **कस्याञ्चिदित्य-**नेन [3]विशेषानुल्लेखेन सर्वत्रावासयोग्यतोक्ता । **सुप्तपारावतायामित्यनेन** निर्जनतासूचकेन स्थानस्य विलासयोग्यतोक्ता । तर्ह्यत्र रम्यस्थाने कथन्न मे चिरवास इत्यत आह—**खलु** यतः **सुहृदां** मित्राणां कृते **अभ्युपेत**मंगीकृतमनुकृत्यं प्रयोजनकृत्यं यैस्ते जना **न मन्दायन्ते** न श्लथीभवन्ति । तथा च मत्कार्यस्वीकारेण तव विलम्बो नार्हं इति भावः । अन्योऽपि तादृशबलभ्यां चिरविलासेन खिन्नवधूको रात्रिं **नीत्वा** स्वीकृत्य मित्रकार्यवशाद् गन्तव्यशेषं गच्छतीति ध्वनिः । **सौधोपरि कुटीं वलभीं विदुरिति शाश्वतः । वाहयेदिति** स्वार्थेणिच् । बलभीवासेन कामित्वमुक्तम् । यदाह—

'हर्म्यपृष्ठमुडुनाथरश्मयः सोत्पलं मधु मदालसाः स्त्रियः ।

वल्लकी च हृदयंगमस्वनावर्ग एव मदनस्य वागुराः ॥ इति ॥४०॥

१. तदुयं मा० ।

२. 'तनिद्वतो' इति मा० ।

३. विशेषार्थल्लेखेन 'सर्वास्तावासयोग्या इत्युक्तम् इति मा० ।

तस्मिन् काले नयनसलिलं योषितां खण्डितानां-

शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।

प्रालेयास्त्रं [1]कमलवदनात्सोऽपि हर्तुं नलिन्याः

प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥४१॥

अतो हेतोरादित्यमार्गं शीघ्रं **त्यज** त्यक्ष्यसि । कालसामान्ये लोट् । यतः तस्मिन् काले प्रभाते खण्डित [स्त्री]णामश्रु जलं प्रणयिभिर्वल्लभैः **शान्तिमुपशमन्नेयं** प्रापणीयम् । त्वयि रविमार्गावरके प्रभाताज्ञानात् खण्डितानामनुनयाभाव इति तदनुग्रहाय तथा कार्यमिति भावः । **सोऽपि** भानुः [पद्मिन्याः] कमलमेववदनं तस्मात् **प्रालेयं** हिमं तदेवास्त्रं रोदनाश्रु **हर्तुं प्रत्यावृत्तः** [2]प्रत्युपेतः **त्वयि कररुधि** किरणरोधके सति **अनल्पाभ्यसूयो** बहुकोपः स्यात् । [तया] च त्वयि मार्गानावरके भानोरपि निशाविरहितपद्मिनीसमाश्वासः स्यादिति भावः । शब्दच्छलेन **करो** हस्तः । खण्डिताया नेत्रजलं प्रभाते पतिः करेण प्रोञ्छतीति तत्कररोधे रोष उचित एव । एतेन भानुनलिन्योः नायकनायिकात्वमुक्तम् ।

निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रितांगः ।

[3]यस्याः कुतोऽपि गृहमेति पतिः प्रभाते सा खण्डितेति गदिता कविभिः पुराणैः ॥

आसां समाश्वास उचित एव । यदाह—

सद्यः प्रणयमुज्झन्ति म्रियन्ते चातिरोषणाः ।

मानिन्यः खण्डिताश्चैव तत्क्षणादप्रसादिताः ॥

कररुधीति क्विबन्तः ॥४१॥

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने-

छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।

तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-

न्मोघीकर्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥४२॥

गम्भीराख्याया नद्या अथ चोक्तिश्लेषेण गम्भीरजलाया मनसीव स्वच्छे जले **छाया** प्रतिविम्बः तद्रूपोऽप्यात्मा **प्रकृतिसुभगः** स्वभावरम्यस्ते प्रवेशं प्राप्स्यति । अनिच्छन्नपि त्वं छायया प्रविष्टः स्या [4]इत्यर्थः । ततोऽस्यास्त्वां चित्ते धारयन्त्याः [5]**कुमुदविशदानि** शुभ्राणि **चटुलानि** चञ्चलानि शफरीणां प्रोष्ठी मत्स्यानाम् **उद्वर्त्तनानि**

१. नयनात् इति सु० वि० ।

२. प्रत्यापतस्त्वयि इति मा० ।

३. तस्याः इति मा० ।

४. स्यादित्य० इति मा० ।

५. विषदानि इति मा० ।

परिवर्तनान्येव **प्रेक्षितानि** दृष्टिपातानि धैर्यान्निष्फलीकर्त्तुं नार्हसि । अद्धा धैर्यं पाण्डित्यमवलंव्य । **ल्यब्लोपे पञ्चमी** । तथा च पाण्डित्यानुचिताचरणं तव स्यादित्युक्तम् । अनेन सानुरागनायिकादर्शनेन रसवत्त्वमुक्तम् । इह गम्भीरा नायिका, मेघो नायकः । अन्योऽपि नायको गम्भीराशयनायिकाहृदये **छायया** ऽत्कोचदानेन प्रविश्य तत्कटाक्षान्न निष्फलीकरोतीति ध्वनिः नायिका पक्षे—

विकाराः सहजा यत्र लोभमोहमदादयः ।
विकारं नोपगच्छन्ति तद् गाम्भीर्यमुदाहृतम् ॥ इति **भरतः** ।

शुद्धसूचिकसंकाशं मन इत्यागमः । **पालनोत्कोचयोश्छायेति विश्वः** । तस्याः प्रवेशे परिचयविलम्बोऽपि न कार्यः । यदाह—

आकारेणात्मनो भावं या नारी संप्रकाशते ।
क्षिप्रमेवाभियोज्या सा प्रथमे एव दर्शने ॥

गम्भीरास्तास्तु या नार्यः सदृश्यो रोषतोषयोरिति भरतः । **प्रोष्ठी तु शफरी द्वयोरित्यमरः** ॥४२॥

तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं-
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि-
ज्ञातास्वादः [1]पुलिनजघनां को विहातुं समर्थः ॥४३॥

तस्याः गम्भीरायाः **सलिलमेव** वस्त्रमावरकत्वात् । **नीलं** श्यामं **हृत्वा** आकृष्य, पानेनेत्यर्थः । अत एवाकर्षणात् **मुक्तौ रोधसी** एव **नितम्बौ** येन [तत् । प्राप्ता वा] नीराणां वेतसवृक्षाणां शाखा येन । अत एव **किञ्चित्करधृतमिव** लज्जया हस्तावलम्बितमिव । इह तटद्वयस्थित [2]वेतसस्य करद्वयतुल्यता, तच्छाखानां [च] तदंगुलितुल्यतोक्ता । **किञ्चिदित्यनेन** तपस्याप्यान्तरः संभोगानुरागो व्यज्यते । नीलमित्यनेनाभिसारिकात्वमुक्तम् । सा हि नीलं वासः परिधत्ते । यद्वा ऽनीलं त्रमित्यकारप्रश्लेषः । लम्बमानस्य गुरुत्वात्ते तव **प्रस्थानं** गमनं **कथमपि** कदर्थेन **भावि** भविष्यति । तत्र हेतुः—पुलिनमेव जघनं यस्याः तां नदीं [3]**ज्ञातास्वाद** उपभुक्तरसः कस्त्यक्तुं **समर्थः** । अपि तु न कोऽपीत्यर्थः । यद्वा **को**ब्रह्मा त्यक्तुं समर्थो वीतरागत्वान्न पुनः संसारीत्यर्थः । अन्यस्यापि कामिनः कामिनीवस्त्रमाकृष्य लम्बमानस्य कथमपि गमनं भवति । यतः पुलिनमिव वृहज्जघनं यस्याः तां ज्ञातसंभोगरसः कस्त्यक्तुं शक्तः, अपि तु न कोऽपीति

१. विपुलजघनाम् म० सिं०, सु० वि० बल्लभ० । विवृतजघनाम् इति पाठा० ।
२. रेतस्य इति मा० ।
३. ज्ञातास्वादम्रप० इति मा० ।

ध्वनिः । **वेतसे नीरवञ्जला** इत्यमरः । **प्रस्थानं गमनं गम** इति च । **कः प्रजापतिरुद्दिष्ट इत्येकाक्षरः** ॥४३॥

त्वन्निष्पन्दोच्छ्वसितवसुधागन्धसंपर्कपुण्यः[1]-
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्यास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते-
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥४४॥

ते तव संबन्धी **वायुर्नीचैर्**मन्दं मन्दं **वास्यति** गमिष्यति कीदृशः—त्वदीयजलवर्षणो**च्छ्वसित** उद्भूतो यो **गन्धः** तत्संबन्धेन **पुण्यः** शोभनः शैत्यसौगन्धाभ्यां **स्रोतोरन्ध्रस्य** स्थूलनासिकाविवरस्य शब्दितेन मनोज्ञं यथा तथा हस्तिभिः **पीयमानः** आस्वाद्यमानः । दन्तिनामूर्ध्वमुखीभूय वातं पिबतां नासारन्ध्रेण शब्दो जायत इति जातिः । **शीतो**ऽतिशीतलः त्वसंबन्धान् वनोदुम्बरफलानां **परिणमयिता** । अनेनापि सौरभं दर्शितम् । यद्वा **काननोदुम्बर**वृक्षाणां **परि** सर्वतोभावेन [न]**मयिता** नमनकर्त्ता इत्यनेनास्य मान्द्यमुक्तम् । न च परिपूर्वस्य नमेः पाकवाचित्वेन तदन्यथाकरणे रुढिच्यु[त]को दोष इति वाच्यम्, परिणतिरुत्तरकालविशुद्धिरित्यादौ तस्यानेकार्थत्वात् । तथैव नानाप्रयोगदर्शनात् । न च सर्वतोनमनेन वायोः प्रचण्डता स्यादिति सर्वतो दिङ्नमनमात्रे परिपूर्वस्य तात्पर्यात् । यद्वा **काननोदुम्बराणां** सर्वतोभावेन नमनकर्त्ता, अतो न प्राचण्ड्य [म्] इत्याशयः । कीदृशस्य— **देवपूर्वं गिरिमुपजिगमिषोः** यियासोः । तथा च गुणत्रय[वत्तयाऽभैरवं [2]वास्यती]त्युत्साहनमिति भावः । **तन्निष्पन्देति** पाठे तस्य देवगिरेः निष्पन्द निर्झरः । एतेन वर्षासूचनम् । **स्रोतः करिकरेऽपि चेति विश्वः** । वास्यनीति **वा गतिगन्धनयोर्लृट्** । देवपूर्वमित्यत्र शब्दपरत्वं नामनिर्वाहकतया न त्वर्थपरत्वमित्यवधेयम् । [3]काननपदेनोदुम्बराणामव्याहततया रम्यत्वमुक्तम् ॥४४॥

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा-
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां [4]चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥४५॥

तत्र देवगिरौ **स्कन्दं** कार्त्तिकेयं **भवान् स्नपयतु** अभिषिञ्चयतु । गगनगंगाजलस्निग्धैः **पुष्पासारैः** । कोदृशः—**पुष्पमेघीकृत** आत्मा येन सः । कामरूपत्वादिदम् ।

१. रम्यः इति पाठा० ।
२. वर्ताभरस वा० दित्यु इति मा० ।
३. मव्याहतं तया० इति मा० ।
४. वसूनाम्० सारो० ।

अनेन पुष्पवर्षणयोग्यतोक्ता । कीदृशम्—**नियतावस्थानं तत्रे**त्यर्थात् । अनेनावश्यकं दर्शनं तस्योक्तम् । तस्यावश्यस्नपने हेतुमाह—यतो **वासवीनाम्** ऐन्द्रीणाञ्च**मूनां** सेनानां रक्षानिमित्तं **नवशशिभृता** हरेणाग्निमुखे **तत्तेजो** वीर्यं **संभृतं** निक्षिप्तम् । आदित्यमतिक्रम्य वर्त्तत इति प्रभावातिशयेन सहस्रांशोरप्यभिभावकमित्यर्थः । हरवीर्यं गौर्या [1]धारयितुमशक्तया गंगायां क्षिप्तं तया तेनापि शरवणे । ततः कृत्तिकाभिः परिपालितम् । स कार्तिकेय **इत्यागमः** । नवशशिपदेनैकक[2]लश्चन्द्र उक्तः । अन्यदपि दरोदिते यो लोकरक्षायै मेघेन सिच्यत इति ध्वनिः । **स्नपयत्विति गंगास्नापनार्थमयञ्चे**ति घटादिपाठान्मित्त्वेन **मितां ह्रस्व** इति ह्रस्वत्वम् । **वासवीनामि**त्यत्र **वृद्धाच्छः** इति छो नास्ति **क्वचिदपवादविषयेऽप्युत्सर्गः प्रवर्तत** इति [3]न्यायात् ॥४५॥

ज्योतिर्लेखावलयि गलितं यस्य वर्हं भवानी-
पुत्रप्रेम्णा कुवलयदलप्रापि[4] कर्णे करोति ।
धौतापांगं हरशशिरुचाऽऽप्याययेस्तं[5] मयूरं-
पश्चादद्रिग्रहणगुरुभिर्जितैर्नर्तयेथाः ॥४६॥

स्कन्दस्य मयूरवाहनत्वात्तं **मयूरं आप्याययेः** संतर्पयिष्यसि[6] । निजालोकेन प्रीतं करिष्यसीति भावः । **पश्चात्** प्रीणनानन्तरम् **अद्रिणा** गिरिणा **ग्रहणं** शब्दस्य प्रतिरवद्वारा तेन **गुरुभिर्ग**भीरै**र्गर्जितै**स्त**न्नर्त्तयेथाः** नर्त्तयिष्यसि । कीदृशम्–शुभ्रनेत्रप्रान्तम् । अत्रोत्प्रेक्षा हरशशिरुचा [इवेति] इवार्थस्य गम्यमानत्वात् । यस्य **वर्हं** पिच्छं गौरी कर्णे करोति । अलंकाराय पुत्रस्य यादृशं **प्रेम** तेन । यद्वा पुत्रस्य स्कन्दस्य तद्विषये प्रीत्या । कीदृशम्—**ज्योतिर्लेखावलयि** तेजोराशियुक्तम् । एतेन कुवलयदलसाम्यमुक्तम् । अत एव विचित्रत्वाद्भूषाकरणम् । **गलितं** स्वयं पतितम् । तथा च तादृशमेव वर्हं पुत्रप्रीत्या सा गृह्णाति न तु स्वयमुत्पाटयतीति भावः । **कुशलयदलं** नीलोत्पलदलं पत्रं प्राप्तुमनुकर्त्तुं शीलं यस्य, वर्हस्य नीलोत्पलानुकारित्वात् । यद्वा कीदृशि कर्णेकुवलयदलं प्राप्नोतीति क्विबन्तरूपम् । यद्वा कुवलयदलं प्राप्तुं शीलं यस्य तादृक्कर्ण इति समस्तमेव । तथा च गौर्य्यास्तत्रादरेणावश्याप्यायनीयतोक्ता ॥४६॥

---

१. धारयतु० इति मा० । वार्त्तायामस्या कश्चिद्व्यत्यासो लक्ष्यते ।
२. कला इति मा० ।
३. वान्ययात् इति मा०
४. स्पर्धि स० ती० ।
५. पावके: इति पाठा ।
६. संतप्ययिष्यति मा० ।

आराध्यैनं शरवणभवं देवमुल्लंघिताध्वा-
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिस्त्यक्तमार्गः[1] ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्-
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्यकीर्तिम् ॥४७॥

उक्तक्रमेणै**नं शरवणभवं** स्कन्दं **देव**माराध्य **रन्तिदेवस्य** राजभेदस्य **कीर्तिं** नदीरूपां **मानयिष्यन्** सम्मानयितुं जलपानेन त्वं **व्यालम्बेथाः** आलंबिष्यसे । जलग्रहणादिति भावः । कीदृशः—**उल्लंघिताध्वा** अतिक्रान्तपथः । **वीणिभिर्वी**णायुक्तैः सिद्धमिथुनै**र्जलकणभयात्** जलकणाद्रातंत्री कुस्वरा स्यादिति कृत्वा तैस्त्यक्तपथः । कीर्त्ति कीदृशीम्—**सुरभितनया**नां कपिलगवीना**मालम्भो** मारणं, ततो जातां भूरिप्रवाहमूर्त्या **परिणतां** ख्यातिमुपगतां वा । रन्तिदेवनाम्ना राज्ञा गोमेधसहस्रे कृते तत्र हतानां गोकुलनां रक्तप्रवाहै**श्चर्मण्वती** नदी वृत्ता, सैवास्य मूर्त्ता कीर्त्तिरिति पुराणम् । **शरजन्मा षडानन** इत्यमरः । **व्रीह्यादित्वादिनि** वीणा । **सुरभिर्गवी च स्त्रियाम्** इत्यमरः । **आलम्भपिञ्जविशरघातोन्मानवधाअपी**ति च ॥४७॥

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे-
तस्या सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगयो [2]नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥४८॥

शार्ङ्गिणः कृष्णस्य **वर्णचौरे** श्यामवर्णे **त्वयि जलमादातुं** ग्रहीतु**मवनते** लम्बमाने सति । तस्याश्चर्मण्वत्या महान्तमपि **प्रवाहं** व्यवहितत्वात्त**नुं** सूक्ष्मं **गगनगतयः** खेचरा **दृष्टीरावर्ज्य** नेत्राण्यवनतीकृत्य द्रक्ष्यन्ति । **नूनं** शंकायां निश्चये वा । **स्थूलं मध्ये** इन्द्रनीलरत्नं यस्य तादृशमेवमद्वितीयं श्रेष्ठं वा मुक्तागुणां हारमिव भूमेः । इह मेघस्येन्द्रनीलेन प्रवाहस्य हारेण साम्यम् । **अद्वयश्रेष्ठयोरेकमिति शाश्वतः** ॥४८॥

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां-
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्री[3]मुषामात्मविम्बं-
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ॥४९॥

---

१. दत्तमार्गः विल्स० दत्तवर्त्मा, मुक्तमार्गः मल्लि० क्रु० ।
२. दूरम्० सु० वि०, सारो०, स० ती० ।
३. युषाम् विल्स० ।

तान्नदीमुत्तीर्य सन्तीर्य **त्वं व्रज** गच्छ। **दशपुरं** नाम नगरभेदस्तत्र **स्त्रीनयन-कौतुकानामात्ममण्डलं पात्रीकुर्वन्** विषयीकुर्वन् सन्। कीदृशानाम्—परिचितोऽभ्यस्तो **भ्रूलतयोर्विभ्रमो** विलासो येषु तेषाम्। उर्ध्वीक्षणाय **पक्ष्मोत्क्षेपात् उपरि विलसन्ती** चलन्ती **कृष्णसाराणां** श्यामताराणां प्रभा येषु तेषाम्। यद्वा **उपरि** चलन्ती **कृष्ण-सारस्य** मृगभेदस्येव प्रभा येषु। यद्वा कृष्णसारेण कज्जलेन प्रभा येषु। यद्वा कृष्ण-सारेण दृष्टिमण्डलेन प्रभा येषु। **कृष्णसारो मृगे श्यामतारायाक्षिमण्डले कज्जले शिशपायाञ्चेति** धरणिः[1]। 'कृदभिहितो भावो द्रव्यवत्प्रकाशत' इति न्यायात् **कुन्दक्षेप** उत्क्षिप्तकुन्दपुष्पाणि [तदनुगामिनो **मधुकरा** भ्रमराः] तेन ये भ्रमरास्तच्छोभाभागि-नाम्। तथा च तत्पु[रगतना]री सविलासवीक्षितो व्रजेति भावः। इह कृष्णसारस्य भ्रमरेण, श्वेतभागस्य कुन्देन साम्यम्। **क्षेपस्तु प्रेरणनिन्दयोरिति धरणिः**। [म]धु कुर्वन्तीति मधुकराः अत्र क[रोते]रुपयोगार्थः कुतूहलमेव कौतूहलम्। **प्रज्ञादित्वात्स्वार्थे** अण्॥४९॥

ब्रह्मावर्त्तं जनपदम्[2]धश्छायया गाहमानः-
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा-
धारापातैस्त्वमिव कमलान्यभ्यषिञ्च[3]न्मुखानि॥५०॥

तत् कौरवं क्षेत्रं भजेथाः गच्छेः। पुण्यार्थं तस्य सेव्यत्वात्। कीदृशम्—क्षत्रि-याणां **प्रधनं** युद्धम्, तस्य **पिशुनं** सूचकम्। तद्दर्शने [4]महाभारतं युद्धमिह भूतमिति [4]स्मर्यते इति भावः। **तच्छब्दः** प्रसिद्धौ कीदृशः—ब्रह्मावर्त्तदेश**मधश्छायया** अधः—प्रतिविम्बेनातपाभावेन वा **गाहमानो** व्याप्नुवन्। **यत्र क्षेत्रे गाण्डीवधन्वा** अर्जुनः **शितशराणां** [निशि]तनाराचानां **शतैः** क्षत्रियाणां मुखान्यभ्य**षिञ्चत** अभिषिक्तवान्। यथा **कमलानि** पद्मानि धारासंपातैः त्वमभिषिञ्चसि तथेत्यर्थः। एषापि तत्क्षेत्र-प्रसिद्धिर्लोके। [5]शतपदं बहुत्वोपलक्षकम्, [तेन स]हस्रादि लाभः। तथा च पुण्यक्षेत्र-मतिप्रसिद्धम्। धर्मादिलाभाय त्वया अवश्यं गन्तव्यमिति भावः।

सरस्वतीदृषद्वत्योर्महानद्योर्यदन्तरम्।
तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते॥ इति **स्मृतिः**।

क्षतात्त्रायत इति क्षत्रः, **आतोऽनुपसर्गे कः**। **युद्धमायोधनं जन्यं प्रधनमित्यमरः**। **पिशुनौ खलसूचकाविति** च। गाण्डीवं धनुरस्य, **धनुषश्च वा** [ ]॥५०॥

१. धरणिः मेदिनी मा०।
२. मथच्छायया इति पाठा०।
३. अभ्यवर्षत् इति पाठा०।
४. महाभारते इति मा०।
५. शतपत्रम् इति मा०।

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां-
[1]बन्धुस्नेहात्समरविमुखो लांगली याः सिषेवे।
कृत्वा तासाम[2]भिगममपां सौम्य सारस्वतीना-
मन्तः शुद्धस्त्वमसि[3] भविता वर्णमात्रेण कृष्णः॥५१॥

हे **सौम्य तासामपां सारस्वतीनां** सरस्वतीजलानाम**भिगमनं** संगमं **कृत्वा** **त्वमन्तः शुद्धो** निष्पापो **भवितासि**। **वर्णो** रूपं [4]**तन्मात्रेण** लक्षितः **कृ[ष्णः]** श्यामः। तथा च श्यामवर्णस्त्वं न त्वन्तर्मलिनस्तज्जलपानेन पावित्र्यात्। यद्वा वर्णमात्रेणाक्षर-मात्रेण **कृष्णः** अक्षरारूढः। परन्त्वयि कृष्णिमा न [त्वन्तरस्तीति अत एव च] **वर्णमात्रेण** **कृष्णः** वासुदेवोपमः। तस्यापि श्यामतनुत्वादित्युक्तिश्लेषः। यथा सुवर्णेन धनीत्यत्र तद्रूपमेव तद्धनं जायते। तथात्रापि कृष्ण एव वर्णः प्रतीयते। अथ च शुद्धः कृष्णश्चेति विरोधाभासः। या अपः **अभिमतरसा** इष्टमाधुर्याः, **रेवती** [5]बलभद्रवधूस्तन्नेत्रचिह्नाः, स्वच्छसुरायां तन्नेत्रप्रतिबिम्बात्। अनेन वनिता दत्तामपि **हालां** सुरां त्यक्त्वा **लाङ्गली** बलभद्रो **बंधुस्नेहात्** युद्धपराङ्मुखः **सिषेवे** आश्रितवान्। तथा च नित्यप्रिय स्वच्छ-प्रियादत्तसुरात्यागेनापां स्वादुत्वपावित्र्ये उक्ते। **सुरा हलिप्रिया हालेत्यमरः**। **रेवती-रमणो रामः कामपालो हलायुधः** इति च। भारत युद्धावसरे बन्धुनाशमसहिष्णुर्विष्णु-वाक्याद्बलस्तीर्थयात्रां चकारेत्यागमः। [6]इहाभिगमपदेन संभोगोऽप्यपां प्रतीयते। **भवितेति** तृचि रूपम्। लुटि भविष्यत्कालार्थतया **असी**त्यस्य वैयर्थ्यमानर्थ्यं वा स्यादि-त्यवधेयम्। **वर्णो रूपयशोऽक्षरे** इति विश्वः॥५१॥

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां-
जह्नोः कन्यां सगरतनयस्वर्गसोपानपंक्तिम्।
गौरीवक्त्रभ्रुकुटिरचनां या [7]विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता॥५२॥

तस्मात् कुरुक्षेत्रात् जह्नुकन्यां गंगां **गच्छेः** यायाः। **अनुकनखलं** कनखलसमीपे। विभक्त्यर्थेऽव्ययीभावः। यद्वा **अनुकनखलं** तं लक्षीकृत्य। कीदृशीम्—हिमालयाल्लम्ब-

१. बन्धुप्रीत्या इति पाठा०।
२. अधिगम० इति पाठा०।
३. त्वमपि इति पाठा०।
४. तन्मन्त्रेण इति मा०।
५. मातृकायाममन्तप्रयोगा दृश्यन्ते।
६. इहागम० इति मा०।
७. विहस्यैव, विल्स०।

मानाम् । तथा च गंगाद्वारं गच्छेति भावः । **सगरस्य** राज्ञः पुत्राणां स्वर्गस्य **सोपानपंक्ति** निःश्रेणिकापंक्तिम् । स्वर्गसुखारोहणहेतुतया सोपानपंक्त्या रूपकम् । हिमाद्रेः पतन्ती गंगा भक्त्या सोपानपंक्तिरिव लक्ष्यते । सगरपुत्राः गंगाजलपूता स्वर्गं गता इति श्रुतिः । या फेनैर्गौर्या वक्त्रे सपत्न्यभ्यदाया कृतां भ्रूभंगिं विरचनां [1]सोढ्वेव हरस्य केशं जग्राह । हरशिरःस्थित **इन्दौ** लग्ना ऊर्मिरेव हस्तो यस्याः सा । अनेन ग्रहणयोग्यतोक्ता । शुभ्रत्वेन फेनानां हाससाम्यम् । तथा च गौर्याअपि जगन्मायाया गंगाधिकेति तां गच्छेरिति भावः ॥५२॥

तस्याः पातुं सुरगज इव व्योम्नि [2]पूर्वार्धलम्बी-
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदिभवतः स्रोतसिच्छाययाऽसौ-
स्यादस्थानोपगतयमुनासंगमे[3]नाभिरम्या ॥५३॥

गगने पूर्वभागेन लम्बमानस्तिर्यक् वक्रीभूतः सन् यदि त्वं जाह्नव्या अत्यच्छं पयः **पातुं तर्कयेः** गच्छेः । यथा देवदन्ती तत्पानीयमादातुं **पूर्वार्धलम्बी व्योम्नि** तथा त्वमपीत्यर्थः । कीदृश्याः—**संसर्पन्त्याः** वहन्त्या इति यावत् । यद्वा **भवच्छायया** प्रतिबिम्बेन प्रवाहे च संगच्छन्त्याः । अत **एवास्थाने** प्रयागातिरिक्तस्थाने वृत्तयमुनासंगमेन तदा **रम्या स्यात्** । यद्वा प्रवाहे भवतः प्रतिबिम्बेन तत्क्षणात् अत एवास्थानात् अकस्माद् गंगायमुनासंगन मनोज्ञत्वमित्र्थः । प्रतिबिम्बचलनेन तस्या नायिकात्वं मेघस्य नायकत्वमुक्तम् । अन्यापि नायिका कान्तसंगेन कामभावाद्वेपथुमती जायते । **कृष्णमेघेन** यमुनासाम्यम् ॥५३॥

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां-
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृंगे निषण्णः-
शोभां शुभ्रत्रिनयनवृषोत्खातपंकोपमेयाम् ॥५४॥

तुषारैर्गौरं श्वेतम**चलं** हिमालयं **प्राप्य** त्वं **शोभां वक्ष्यसि** धारयिष्यसि । कीदृशम्—शिलासु वासिनामुपविष्टानां कस्तूरीमृगाणां **नाभिगन्धैः** सुगन्धीकृतपाषाणम् । **तस्याः** गंगायाः प्रभवमेव जन्मस्थानमेव । कीदृशस्त्वम्—मार्गश्रमापनयननिमित्तं **तस्य**

१. सहित्वेव इति मा० ।
२. पश्चार्धं० इति पाठा० ।
३. संगमेवा० इति पाठा० ।

गिरेः शृंगे स्थितः । शोभां कीदृशीम्—श्वेतशिववृषभोत्पाटितकर्दमेन तुल्याम् । [1]सदर्पो वृषभः शृंगेण पंकमुत्क्षेपयतीति जातिः तथा च तच्छृंगलग्नपंकवत् त्वं शोभिष्यस इति भावः । शृंगस्य शुभ्रत्वेन हरवृषभसाभ्यम्[2] । मेघस्य श्यामस्य च पंकेन[3] साम्यम् । इह हीनोपमा हरवृषभत्वेनोत्कर्षवत्त्वात् समाहिता । अत एव हरवृषसंगेन पंकस्यापि पावित्र्यम् । प्रभवत्यस्मादिति प्रभवः, ऋदोरप् । **श्वेतो गौरो हरिद्राभ इत्यमरः** । **विनयन** इति निमित्तसप्तमी । **शुभ्रमिति** पाठोऽपपाठ एव ॥५४॥

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा-
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्त्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥५५॥

यदि **तमद्रिं दवाग्निर्वनवह्निर्बाधेत** पीडयेत् तदा **एनमग्निं शमितुं** शान्तिन्नेतुं जलासारसहस्रैरत्यर्थं **त्वमर्हसि** । कीदृशोऽग्निः **सरलद्रुमस्कन्धसंघर्षणेन** न ग्राम्यत्वम् । यद्वा **सरति सरले**त्यनुप्रासपोषणान्न ग्राम्यत्वम् । प्रशमने हेतुमाह—यत **उत्तमानां** सतां संपदो विभूतय आपद्गतपीडाप्रशान्तिः फलं यासामेतादृश्यो भवन्ति । अनेन अस्यापि विरहविपन्नस्योपकार उक्तः । **स्कन्धस्तरप्रकाण्डे** चेति **विश्वः** । **धारासंपात आसार इत्यमरः** ॥५५॥

ये त्वो [4]मुक्ताध्वनिमसहनाः स्वांगभंगाय तस्मि-
[5]न्दर्पोत्सेकादुपरि शरभा [6]लंघयिष्यन्त्यलंघ्यम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टिहासा[7]वकीर्णान्
के[8] वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५६॥

तस्मिन् गिरौ ये शरभा अष्टापदा दर्पोद्रेकात् स्वांगभंगनिमित्तं **त्वां लंघयिष्यन्ति** लंघनानुकूलोत्फालनादीनि करिष्यन्ति । त्वां कीदृशम्—उपरि युक्तः । नित्यं

१. सदर्प्पं इति मा० ।
२. सामान्यं इति मा० ।
३. पंकेन च इति मा० ।
४. 'ये संरम्भोत्पतनरभसाः' इति पाठा० ।
५. 'मुक्ताध्वानं सपदि' इति पाठा० ।
६. लंघयेयुर्भवन्तम् इति पाठा० ।
७. पाता० पाठा० ।
८. केषां० का० पा० ।

क्त शब्दम् (?)। **अलंघ्यं** लंघनायोग्यम्, अत्युच्चत्वात्। ते कीदृशाः—**असहना** असहिष्णवः। अर्थात् गर्जितस्यैव। यद्वा तस्मिन् [ध्व]निते असहिष्णव इत्यर्थः। शरभाः किल उपरि शब्दं श्रुत्वा दर्पादसहिष्णवो मेघाक्रमणाय दूरमुत्पत्य पतन्त भग्नांगा भवन्ति। इह [अ]लंघ्यं लंघयिष्यन्तीति सोपहासा लोकोक्तिरियम्। अत एव विरोधाभासोऽपि यद्वा **त्वामुपरि** उद्दिश्यासहनास्त्वामेवालंघ्यां लंघयितुं भविष्यन्तीति शेषः। तुमुन्नर्थे लट्। यद्वा त्वामलंघ्यं लंघयितुं येऽसहनास्त्वल्लंघनायासहिष्णवइत्यन्वयः। तान् शलभान् अत्यर्थं वर्षोपलवृष्टिरेव सोपद्रवो हासः शुभ्रत्वात्, तेनावकीर्णान् [[1]उद्भासितान्] **कुर्वीथाः** करिष्यसि। अत्र हेतुमाह—व्यर्थक्रियाप्रयत्नाः के पराभवस्थानं वा न स्युः, अपि ते सर्व एव। निष्फलकार्योद्यताः सर्व एव परिभूयन्त इत्यन्वयः। **वा** शब्दोऽनवक्लृप्तौ अवधारणे वा। **वर्षोपलस्तु करकेत्यमरः**। **के** इत्यस्य **पदेन** सामानाधिकरण्यमजहल्लिंगतया। स्थानमात्रविवक्षया **पदमित्येकवचनम्**, बहुत्वविवक्षया **के** इति। ततो न भिन्नवचनदोषः ॥५६॥

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः-
शश्वत्सिद्धैरुपचित[2]बलिं भक्तिनम्रः परीयाः।
यस्मिन्दृष्टे करणविगमा[3]दूर्ध्वमुद्धूतपापाः
[4]कल्पन्तेऽस्य स्थिरगणपदप्राप्तये श्रद्दधानाः ॥५७॥

तत्राद्रौ अर्द्धेन्दुमौलेः हरस्य पादारोपणं भक्त्या नम्रः सन् **परीयाः** प्रदक्षिणयिष्यसि, वेष्टयिष्यसि [इति] यावत्। कीदृशम्—**दृषदि** पाषाणे **व्यक्तं स्फुटम्**। अनेन तत्परिणयार्थमुपदेशापेक्षाऽपास्ता। तथा **शश्वद्** वारंवारं **सिद्धैः** किन्नरादिभिः कृतपूजाम्। **बलिः पूजोपहारयोरिति शाश्वतः**। **यस्मिन्** पदन्यासे **दृष्टे** सति दूरमत्यर्थं निष्पापाः सन्तः **श्रद्दधानाः** श्रद्धावन्तो जनाः **करणविगमादंगनाशानन्तरमस्य** शिवस्य स्थिरा नित्या नन्द्यादीनां या पदप्राप्तिस्तस्यै[5] कल्पान्ते शक्ता भवन्ति। अर्द्धेन्दुर्मौलौ यस्येति, अत्र **सप्तमीविशेषणे बहुव्रीहाविति**। मौलिशब्दस्य न पूर्वनिपातस्तद्विधेरनित्यत्वात्। **परीया** इति परिपूर्वादिणो लिङिरूपम्। **करणन्त्विन्द्रिये काये इति विश्वः**। **प्राप्तय** इति तादर्थ्ये चतुर्थी। यद्वा अलमर्थे **नमः स्वस्तीत्यादिना** चतुर्थी ॥५७॥

---

१. भ्रातशितान् इति मा०।
२. रुपहित०, रुपहृत० का० पा०।
३. दूर्ध्व० पाठा०।
४. संकल्पन्ते, सारो०, सु० वि०, म० सिं०, कल्पिष्यन्ते मल्लि०।
५. कस्मै इति मा०।

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः-
[1]संरक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।
[2]निह्रीदी ते मुरज इव चेत्कन्दरेषु[3] ध्वनिः स्या-
त्संगीतार्थो ननु पशुपतेस्तत्र भावी [4]समस्तः ॥५८॥

कीचका वंशभेदा वातैर्मन्दं यथा तथा **पूर्यमाणाः शब्दायन्ते** शब्दं कुर्वन्ति। यद्वा **कीचका मधुरं** यथा तथा **शब्दायन्ते**, वातैः पूर्यमाणाः सन्तः। इह **वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता** इत्यनिलैः पूर्यमाणा इति न च पुनरुक्तम्, **वंशमात्रेऽपि कीचक** इति कोषात्। यद्वा **पूर्यमाणा** इत्यनेन पूरणस्य वर्तमानपरिशेषोक्तेरपौनरुक्त्यम्, **न पौनरुक्त्यं** विशेषश्चे[दि]त्यभिधानात्। **संरक्ताभिरनुरागिनीभिर्मधुराभिर्वा** किन्नरस्त्रीभि**स्त्रिपुरविजयो** हरकृतत्रिपुरदैत्यजयो गीयते। यथा मर्द्दले शब्दस्तथा। यदि तत्रादौ गुहासु **निह्रीदी** प्रति[प्रस]वानन्तरं ध्वनिः स्यात् तदा [5]ननु शिवस्य **संगीतार्थः** संगीतप्रयोजनं संगीतपदवाच्यो वा **समस्तो भावी** भविष्यति। वंशगीतमर्द्दलैः किल संगीतं तदिह वृत्तमिति भावः। तदिह मन्दवातसंगेन, किन्नरीगीतश्रवणेन, शिवसेवया च गमनार्थं मेघस्योत्साह उक्तः। **शब्दायन्त** इत्यत्र **शब्दवैरेत्यादिना** क्यङ्। तत्कालसामान्ये भवन्ती वक्तव्येति लट्। एवं **गीयत** इत्यत्रापि लट्। **निर्घोषनिह्रीदनादनिस्वान इत्यमरः**। **ननु** पदमुप्रेक्षायां संभावनायां वा **भावीति** भविष्यति णिनिः ॥५८॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्-
हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम्।
तेनोदीचीं दिशमनुसरे[6]स्तिर्यगायामशोभी-
श्यामः पादो बलिनियमना[7]भ्युद्यतस्येव विष्णोः ॥५९॥

प्रालेयाद्रेर्हिमालयस्य **उपतटं** तटे तांस्तान् किन्नरादिविलासादिविशेषा**नतिक्रम्य** लंघयित्वा तेन क्रौञ्चादिरन्ध्रेण उत्तराशामनुसरेः [8]यास्यसि। **यत् क्रौञ्चरन्ध्रं हंसद्वारं** हंसगतिवर्त्म **भृगुपतेः** परशुरामस्य **यशोवर्त्म** कीर्त्तिमार्गश्च। पुरा परशुरामेण **क्रौञ्चाद्रौ**

---

१. संसक्ताभिः मल्लि०।
२. निह्रीदस्ते पाठा०।
३. कन्दरीषु वल्ल० म० सिं०।
४. समगुः पाठा०।
५. नन्वहे मा०।
६. अनुपतेः का० पा०।
७. नियमने का० पा० नियम नामो।
८. यास्यति मा०।

रन्ध्रं कृतम् । तेन यथा हंसा मानसं यान्ति चेति वार्ता । त्वं कीदृशः—**तिर्यक् आयामो** दैर्घ्यं तेन शोभाशीलः श्यामवर्णश्च । यद्वा तिर्यक् वक्रीभूत आयामः परिणाहस्तेन शोभावान् । अत एव बलि नाम्नो असुरस्य बन्धनाय उद्यतस्य हरेः श्यामः पाद इव त्वं गतश्चेत्, हंसानामपि भार्गवयशोरुपता गम्यते । **उपतट**मिति समीपार्थे विभक्त्यर्थे अव्ययीभावः । **उत्तरा दिगुदीची स्यादित्यमरः** । **इव** शब्द उत्प्रेक्षायाम् ॥५९॥

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः-
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
[1]श्रृंगोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं-
राशीभूतः [2]प्रतिदिशमिव त्र्यम्बकस्याट्टहासः ॥६०॥

उर्ध्वमुपरि **गत्वा** च त्वं **कैलासस्यातिथिः स्याः**, अभ्यागतोभवेः । कीदृशस्य—रावणबाहुभि**रुच्छ्वासितः** शिथिलीकृतः प्रस्थः सानुस्तेन सन्धिः सन्धानमन्योन्यमिलनं यस्य तस्य देवस्त्रीणामादर्शस्य च स्वच्छशिले कैलासे तासां प्रकृतिराकृतिदर्शने दर्पण-क्रियाकारित्वेन रूपकम् । अतिथिपदेनादरातिशय उक्तः । यः कैलासः कुमुदविशदाभिः[3] श्रृंगोन्नतिभिः **खमाकाशं** व्याप्य स्थितो दिशि वर्त्तुलीभूतः शिव**स्याट्टहास इव** महाहास-तुल्यः । कैलासस्य स्फटिकमयत्वेन सितहासेन साम्यम् । **श्यामवर्णस्तु श्रृंगारः सितो हासः प्रकीर्तित** इति **भरतः** । श्वेतदन्तदीप्तियोगेन वा हासः सितः कविभिर्वर्ण्यते । **प्रस्थः सानुरस्त्रियामित्यमरः** । **खमाकाशमुदाहृतमिति विश्वः** । **त्र्यम्बकस्त्रिपुरान्तक इत्यमरः** । त्रीणि अम्बकानि यस्य । अम्बकं चक्षुरिष्यत इति धरणिरिति व्युत्पत्तिः । क्रुद्धो रावणः कैलासमुत्तोलितवानिति पुराणम् । इव शब्द उत्प्रेक्षायाम् ॥६०॥

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे-
सद्यःकृत्तद्विरददशन[4]च्छेदगौरस्य तस्य ।
[5]शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥६१॥

तस्याद्रेर्भवित्रीं भाविनीं शोभा**मुत्पश्यामि** तर्कयामि । चिपकणमृदितकज्जलप्रभे **त्वयि तटगते** सति । यद्वा **भिन्नाञ्जनं** जातिभेदस्तदाभे । कीदृशस्य तत्क्षणच्छिन्न-

१. तुंगोच्छ्रायैः विल्स० ।
२. प्रतिदिनम् मल्लि० ।
३. कुमुदवद्धरनाभिः मा० ।
४. रदन० पाठा० ।
५. लीलामद्रेः का० पा० प्रभृ० ।

हस्तिदन्तखण्डवद्गौरस्य श्वेतस्य । कायदत्ते **मेचके** श्यामे वाससि सति **हलभृतो** बलभद्रस्य यथा शोभा तथा भवित्रीत्यर्थः । अत एव तादृशशोभाया अपूर्वत्वेन तत्रत्य जनैर्निस्पन्दनेत्रदृश्याम् । स्निग्धेत्यादि वासस्यपि योज्यम्, **सद्य** इत्यत्रापि बलभद्रेऽपि । अद्रेः शुभ्रत्वमहत्त्वाभ्यां बलेन साम्यम् । मेघस्य वस्त्रण । **भिन्नौ दारितसंगतावित्यमरः** । अन्योऽपि हलभृद्धलवाहकः श्यामवस्त्रमंगे दधातीतिध्वनिः । **सितीव बलमेचके इत्यमरः** ॥६१॥

तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता-
क्रीडाशैले यदि च [1]विचरेत्पादचारेण गौरी ।
भंगीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः-
सोपानत्वं [2]व्रज पदसुखस्पर्शमारोहणेषु ॥६२॥

तत्राद्रौ यः **क्रीडाशैलः** तत्र **पादचारेण** चरणसंचारेण यदि **गौरी विचरेत्** भ्रमेत । कीदृशी—**भुजगवलयं** सर्पकंकणं त्यक्त्वा शिवेन दत्तस्वहस्ता तत्रस्थसर्पदर्शने तस्या उद्वेग इति तत्त्यागः । गुरुनितम्बादिनान्तरत्वेन स्खलनशंकया प्रेम्णा वा हस्त-दानमिति भावः । तदा त्वमारोहणेषूपरिगमनेषु **सोपानत्वं** षट्कलिकात्वं गच्छ । **भंगीभक्त्या** विवर्तदिरेण कृतसोपानाकृतिशरीरः । यद्वा **भंगी** भंगयुक्तः, कुटिलाकार इति यावत्, **भक्त्या** आदरेण **विरचितवपुः** निश्चिलीकृताभ्यन्तरजलपूरश्च, इच्छारूपत्वात् । चलजलेऽपि छिन्नत्वेन गौर्याः पदस्खलनाशंकेति भावः । कीदृशम्—पदसुखश्चरण-सुखदः स्पर्शो यत्र । तत् मृदु मसृणस्पर्शत्वात् शैलशिलास्पर्शस्य दुःखदत्वेन त्वत्स्पर्शं सुखदं ज्ञात्वा सा प्रसन्ना स्यादिति भावः । क्रियाविशेषणञ्चेदम् । तथा च त्वमेव तत्पद-स्पर्शसुखमनुभवितेति भावः ॥६२॥

तत्रावश्यं बलयकुलिशोद्घट्टनोद्गीर्णतोयं-
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे [3]घर्मलब्धस्य न स्या-
त्क्रीडालोलाः श्रवणपरुषैर्गर्जितै[4]र्भाययेस्ताः ॥६३॥

१. विहरेत् पाठा० ।
२. कुरु सुखपदारोहणाया गुयायी, विलस० । कुरु मणितटारोहणायाग्रयायी पाठा० ।
३. शर्म० पाठा० ।
४. भीषयेः भापयेः पाठा० । कृष्णपतिरपि भाययेरिति पाठं व्याख्याय भीषयेरिति पाठमुद्धरति ।

तत्राद्रौ देवस्त्रियस्त्वां निश्चितं **यन्त्रधारागृहत्वं** प्रतिभित्तिजलस्राविगृहत्वं **[नेष्यन्ति]** प्रापयिष्यन्ति । त्वां कीदृशम्—कंकणहीरकस्योत्**घट्टनेन** चालनेन उद्गीर्ण-मुद्वान्तं तोयं येन । हे सखे ! ग्रीष्मकाललब्धस्य **तव** ताभ्यो देवस्त्रीभ्यो मोक्षस्त्यागो [यदि] न भवेत् तदा कर्ण [क]टुभिः शब्दितैस्ता **भायये:** त्रासयिष्यसि । तेन त्वां तास्त्यजन्तीति भावः । कीदृश्यः **क्रीडाचपलाः** । एतेन तासां क्रीडासक्तत्वेन त्वया गन्तव्यमिति भावः । **कुलिशं हीरके [पवौ इ]त्यमरः । प्रतिभित्तिजलस्रावियन्त्रधारा-गृहं विदुरिति शाश्वतः । त्यागनिर्वाणयोर्मोक्ष** इति **विश्वः । घर्मः स्यादातपे ग्रीष्मे** इति **धरणिः । भाययेरि**त्यत्र गर्जितस्य हेतुतया **भीस्म्योर्हेतुभय** इति [न] तङ् ॥६३॥

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः-
कुर्वन्कामं[1] क्षणमुखपटप्रीतिमैरावतस्य[2] ।
धुन्वन्वातैः[3] सजलपृषतैः कल्पवृक्षांशुकानि-
च्छायाभिन्नस्फटिकविशदं निर्विशेस्तंनगेन्द्रम् ॥६४॥

तं नगेन्द्रमद्रीशं निर्विशेः उपभोक्ष्यसि । कल्पवृक्षादिवस्त्रग्रहणेनेति [यावत्] । किं कुर्वन् [मान]सस्य सरसो जलं गृह्णन् । कीदृशम्—सुवर्णपद्मप्रसवशीलम् । तथा [4]चापूर्वपद्मदर्शनेन ते प्रीतिः स्यादिति भावः । जलस्य पद्मगन्धसरसि निलयेनात्युपा-[देय]तोक्ता । तथा कामादिक्ष[मत्वञ्चोक्तम्] । **ऐरावतस्य**''' मुहूर्त्त मुखपटस्यास्या-च्छादकवस्त्रस्य हर्षं **कुर्वन्** । तथा च स्वेच्छया मुखपटीभूय तं हर्षयिष्यसीति भावः । यद्वा **कामात्** कामरूपत्वात् । **कामरूपेऽपि कामः स्यादिति विश्वः** । तथा च काम-रूपत्वेन ते मुखपटीभवनेन तस्य स्थूलहस्तावलेपो न स्यादिति भावः । तथा **सजलपृषतैः** जलविन्दुसहितैः स्ववातैः[5] कल्पवृक्षवस्त्राणि **धुन्वन्** कम्पयन् । तं कीदृशम्—**छायया** प्रतिबिम्बेन भिन्नः संगतः (?) स्फटिकेन **विशदः**[6] शुभ्रः, पश्चात् कर्मधारयः तम् । **आदानं ग्रहणेऽपि स्यादिति** धरणिः । **पृषन्ति विन्दुपृषत इत्यमरः । निर्वेश उपभोगः स्यादिति विश्वः** । अन्योऽपि कामी कामवशात् कामिनीमुखे आच्छादकतया पटहर्षं कुर्व[न्] तद्वस्त्राणि धुन्वंश्च तामुपभुनक्तीति ध्वनिः ॥६४॥

१. कामात् विल्स० ।
२. ऐरावणस्य का० पा० प्रभृ० ।
३. धुन्वत्वातैः सजलपृषतै (नयनैः) कल्पवृक्षांशुकानि, च्छायाभिन्नस्फटिकविशदं निविशेः पर्वतं तम्, विल्स० ।
४. च पूर्वं इति मा० ।
५. मुखतैः मा ।
६. विषदः मा० ।

तस्योत्संगे प्रणयिन इव स्रस्तगंगादुकूलां -
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमानै[1]-
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥६५॥

हे **कामचारिन्** इच्छागामिन् तस्याद्रेः क्रोडे दृष्ट्वा पुन**रलकां** पुरीं **न न ज्ञास्यसे** किन्तु ज्ञास्यस एव । सम्बोधनेन तत्र गमनयोग्यतोक्ता । कीदृशम्—**स्रस्तं** गलितं गंगैव दुकूलं पट्टवस्त्रं यस्याः तां । कस्येव **प्रणयिन इव** नायकस्येव । नायिकापि नायका-नुरागात् स्रस्तवस्त्रा तत्क्रोडे वसतीति ध्वनिः ।

वेपथुः स्वेदरोमाञ्चौ नीवीस्रंसनमेव च ।
भर्त्तुरालिंगने स्त्रीणां जायन्ते मुकुला दृशः ॥ इति **भरतः** ।

या अलका **वो** युष्माकं मेघानां **काले** वर्षासु महद्भिर्विमानैः प्रासादै**रभ्रवृन्दं** मेघसमूहं **वहति** विभर्त्ति । कीदृशम्—सलिलमुद्गिरतीति, **कर्मण्यण्**, जलस्रावीत्यर्थः । यथा मुक्तवृन्दगुम्फितमलकं कामिनी वहति । अन्यापि कामिनी अभ्रं''' इति ख्यातद्रव्यं ललाटे वहतीति ध्वनिः । **पुनः** शब्दो वाक्यभूषायाम् । अलका कामिनीपुर्योरिति विश्वः । **ज्ञास्यस** इत्यत्र **अनुपसर्गाज्ज्ञ** इति तङ् । **उच्चैरि**त्यव्ययम्, तृतीयान्तं वा । **प्रासादेऽपि विमानं स्यादिति विश्वः** । अभ्रवृन्दस्यालकसाम्यम्, विन्दुबहुलजलस्य मुक्तासाम्यम् । दशभिरादिकुलकम् ॥६५॥

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः -
[2]संगीतार्थं प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुंगमभ्रंलिहाग्राः -
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥६६॥

यत्र पुर्यां **प्रासादा** धवलगृहाणि[3] **तैस्तै**र्विलक्षणैः **विशेषै** ललितवनितादि[भि]-**स्त्वां तुलयितुं** सदृशीकर्त्तु**मलं** समर्थाः । कीदृशम्—**विद्युत्वन्तं** तडिद्युक्तं, ते कीदृशा **ललिताः** विलासवत्यो वनिता येषु ते । इह कृत्रिमो विलासस्तत्र स्वाभाविकः स इति साम्यम् । इन्द्रधनुःसहितं चित्रसहिताः । अत्र चित्रस्य नानावर्णत्वादिन्द्रचापसाम्यम् । **संगीतार्थं प्रकर्षेण हता** वादिता **मुरजा** मर्दला येषु ते । स्निग्धोऽपरुषो **गम्भीरो** मधुरो **घोषः** शब्दो यस्य तम् । इह वादने प्रकर्षेण गम्भीरध्वनिजन्योचितहस्तलाघवादिकमुक्तम् । अत एव तादृशमेघेन साम्यम् । अन्तर्जलं स्फटिकादिमणिघटिता **भुवो** येषु ते । इह

१. विमाना पाठा० ।
२. सङ्गीताय कृ० ।
३. गृहास्तै० मा० ।

मणिपदेन जल[साम्यार्थं स्फटिकमणिरुच्यते]। तथा चान्तर्जलमेघेनात्युच्चभुवो गृहान्तर्वर्त्तित्वेन साम्यम्। **तुंगमत्युच्चमभ्रंलिहाग्रा** व्योमस्थशिखराः। एतेन तेषु विश्रामयोग्यतोक्ता। साम्यन्तु व्यक्तमेव। इह मेघवि[शेषणस्य] प्रथममुपक्रान्तस्यानिर्वाहात् क्रमभंग इति न वाच्यम्, अत्र क्रमे कवेरतात्पर्यात्। यद्वा पूर्वप्रक्रान्तसंगीतनिर्वाहो मुरजमुखरीकरणेन स्यात्। यदि च प्रथमं स्निग्धगम्भीरमेघशब्दः स्यात्तदा तेनैव संगीतं निर्वहेदलं मुरजमुखरीकरणेनेति मेघशब्दात्पूर्वं तत्र मुरजरव इति वोधयितुमयं क्रमभंग इति गुण एव इत्यवधेयम्। **अभ्रंलिह** इति **वहाभ्रेलिहः** इति खश्। तुलयितुमिति तुलाशब्दात् **तत्करोति** ण्यन्तात् पर्याप्तवचननेषु तुमुन् ॥६६॥

हस्ते लीलाकमलमलकं[1] बालकुन्दानुविद्धं-
नीता लोध्रप्रसवरजसा पाण्डुतामाननश्रीः[2] ।
चूडापाशे नवकुरबकं चारुकर्णे शिरीषं-
[3]सीमन्तेऽपि त्वदुपगमजं यत्र नीपं वधूनाम् ॥६७॥

यत्र पुरि स्त्रीणां **हस्ते लीलाकमलं** कृतककोपोपनायकसखीताडनादिरतिर्ल्लीला तदर्थं कमलम् नवकुन्दपुष्पखचितमलकञ्च स्त्रीणामित्यस्तीति चेति सर्वत्र योज्यम्। **आननश्रीः** मुखशोभा लोध्रपुष्पपरागेण पाण्डुतां प्रापिता। चूडापाशे मस्तककेशपाशे **नवकुरबकं** नूतन शोनवा (?) पुष्पं, मनोज्ञकर्णे शिरीषपुष्प[म्। यद्वा **चारु**] मनोज्ञं शिरीषम्। **सीमन्ते ऽपि** त्वदुपगमजं मेघकालभवं **नीपं** कदम्बपुष्पम्। इह मेघकालजत्वेन नीपस्य सिन्दूरालंकृतसीमन्तधारणेनात्यादरो मेघे प्रोत्साहनाय ध्वनितः। एवं च सर्वर्त्तुवासस्तत्र तथाहि—

कमलं शारदं, कुन्दं हेमजं, लोध्रशैशिरम्,
कुरबककं वासन्तं, शिरीषं ग्रीष्मजं, वर्षाजं नीपम् इति·······तद्रम्यत्वदिहक्षया·······मुक्तम्। इह **कुरबकारवकारणता** दधुरिति यमकदर्शनेन रेफमध्यता कुरबक शब्दे निर्णीयत इत्यवधेयम् ॥६७॥

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि-
ज्योतिश्छायाकुसुमरचना[4]न्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु[5] [6]रतिरसं कल्पवृक्षप्रसूतं-
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥६८॥

१. मलके पाठा०।
२. माननेश्रीः कृ०।
३. सीमन्ते च कृ०।
४. रचिता० पाठा०।
५. मधुरं का० बा० पाठकः।
६. रतिफलं पाठा०।

यस्यां पुरि **यक्षा** मधुपुष्परस**मासेवन्ते** अत्यर्थं पिबन्ति। कीदृशम्—**रतौ** सम्भोगे **रसा** [1]इच्छानुरागो वा यस्मात्। तत् यद्वा **रतिरसं** मूर्तिरसरागमिवेति रुपकम्। कल्पवृक्षजं च। कीदृशाः—[2]उत्तमा वरवर्णिन्यो याः स्त्रियः ता एव सहाया येषां ते। यद्वा रम्यत्वादिना या उत्तमाः स्त्रीयस्तत्सहिता इत्यर्थः। अनेनार्थद्वयेन स्त्रीपुंसयोरनुरागोक्त्यातिसंभोगरसो ध्वनितः। अत एव कामोद्दीपकतया मधुपानमपि द्वयोः। **सितमणिमयानि** स्फटिकघटितानि हर्म्यस्थलानि **एत्य** गत्वा। इह स्थलपदेन हर्म्यविस्तार उक्तः। अत एवाच्छत्वेन ज्योतिषां तारकाणां छाया प्रतिबिम्बः। स एव पुष्परचने। तारकादिसान्निध्येन हर्म्याणामुत्तुंगतोक्ता। यद्वा ज्यतिषां छायावत् कान्तिवत् पुष्परचना येषु तानि स्वच्छपुष्पवन्तीत्यर्थः। हर्म्यस्थलादिवदिदमपि [3]रागोद्दीपकमेवेतीयं व्याख्या हृद्या। केषु सत्सु पुष्करेषु वायुभाण्डमुखेषु मन्दं मन्दं हन्यमानेषु सत्सु। कीदृशेषु—त्वद्गम्भीरध्वनिरिव ध्वनिर्येषां तेषु। **प्रतिबिम्बेऽपि कान्तौ च छायेति** शाश्वतः। **उत्तमावरवर्णिनीत्यमरः। उपमैव तिरोभूतभेदा रुपकमिष्यत** इति **दण्डी**। ध्वनिरिव ध्वनिर्येषामित्यत्र **सप्तम्युपमानेति** बहुव्रीहिरुत्तरपदलोपश्च। **पुष्करं करिहस्ताग्रे वायुभाण्डमुखे जल** इति **विश्वः** ॥६८॥

[4]गत्योत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः-
[5]क्लृप्तच्छेदैः कनककमलैः कर्णविभ्रंशि[6]भिश्च ।
[7]मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥६९॥

यत्र पुरि **कामिनीना**नभिसारिकाणां **नैशो** निशासंबन्धि **मार्गो** वर्त्म सूर्योदय एतैः **सूच्यते** [ज्ञाप्यते[8]], लोकैरित्यर्थात्। **मन्दारपुष्पैर्दे**वतरुपुष्पैस्तावत्। कीदृशैः—**गत्या** गमनेनो**त्कम्प**श्चलनं तेन अलकात्पतितैः। इहाश्रयचलनेनाश्रितपतनमित्यवधेयम्। कर्णभ्रष्टैः कर्णपद्मैः कीदृशैः—[**क्लृप्तच्छे**]**दैः** कृतपत्रभंगैः, सुकुमारभागग्रहणायेदम्। यद्वा **क्लृप्तच्छेदैः** पत्रावलीभि·········गत्युत्कम्प एव हेतुः। **मुक्ताजालैः** मौक्तिक[संघैः]

१. गच्छा० मा०।
२. उत्तरा मा०।
३. रासो० मा०।
४. गत्यु० कृ० पाठा०।
५. पत्रच्छेदैः पाठा०। पत्रच्छेद्यैः म० सिं०, सु० वि०, वल्ल०, सारो०।
६. विस्रंसिभिश्च सु० वि०, वल्ल०, सारो०, म० सिं०. स० ती०।
७. मुक्तालग्नस्तनपरिमलच्छिन्नसूत्रैः, सु० वि०, म० सिं०, सारो०, मुक्ताजालैः स्तनपरिचित० का० बा० पा०, मुक्ताकालपतनपरिचय० म० सिं०।
८. तन्वायते मा०।

कीदृशैः—स्तनौ **परिसरः** पर्यन्तभूर्येषां तैः। अत एव कठिनस्तनाभिघाताच्छिन्नसूत्रै-स्त्रुटितगुणैः **हारैः** हारसंबन्धिभिः। हाराणाममी **हाराः। तस्येदमित्यण्**। यद्वा **अपपरी वर्जने** इति कर्मप्रवचनीयत्वेन स्तनौ वर्जयित्वा **सरैर्गतैरित्यर्थः**। यद्वा परिसरन्ति परितो लम्बन्त इति **पचाद्यचि** स्तनात् परिसरैः परिभ्रष्टैरित्यर्थः। यद्वा स्तनभ्रष्टै-र्मुक्ताजालैः **सूच्यते**। छिन्नगुणैर्हारैश्च सूच्यत इत्यर्थः। क्वापि छिन्नम्.....................

....

....

....

रभूमौ मध्यदेशे च वेश्मन इति **विश्वः**। जलमुच इत्युचितम्, जलेन चित्रदोषकरणात्। अत एव स्वस्मिन् तेषां तदाशंका। **नायके प्रेरकेनेतेति** धरणिः। **मातरिश्वा सदागति-रित्यमरः** ॥७२॥

यत्र स्त्रीणां प्रियतम[1]भुजोच्छ्वासितालिंगिताना-
मंगग्लानिं सुरतजनितां तन्तुजालावलम्बाः।
त्वत्संरोधापगमविशदैश्चन्द्रपादै[2]र्निशीथे-
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः[3] ॥७३॥

यत्र पुरि स्त्रीणां रतोत्पन्नाम**ंगग्लानि**मंगायासं चन्द्रकान्ताः मणिभेदाः **व्यालु-म्पन्ति** हरन्ति। कीदृशीनाम्—प्रियतमभुजेन पूर्व**मुच्छ्वासिता** उत्तोलिताः पश्चादालिं-गितास्तासाम्। **पूर्वकाले**त्यादिनादिना समासः। अत एव तासामतिखेदः। कीदृशाः—**तन्तुजालावलम्बाः** [4]सूत्रसंघग्रथिताः। **तन्तुजालावलम्बा**दिति पाठे सूत्रजाले ग्रथिता इत्यर्थः। **चन्द्रपादै**रिन्दुकिरणैः प्रेरिताः कीदृशैः—[5]**त्वत्संरोधस्य** [6]**मेघावरणस्यापगमेन** त्यागेन निर्मलैः। व्यक्ततोयकणक्षरणशीलाश्च चन्द्रकरसंगेन चन्द्रकान्ताः क्षरन्तीति वार्त्ता। लोकेऽपि रतान्ते जलक्षालनमंगे अत्र तु विशिष्टजलमेव तदर्थमिति भावः। अन्येऽपि सूत्रजालबद्धा ईश्वरपादैः प्रेरिता रोदनात् स्फुटजलस्यन्दिनो भवन्तीति ध्वनिः। **पादौ रश्मौ पदेऽपि चेति विश्वः**। देशिता (?) इति चेतनधर्मारोपेण समाधिरलंकारः ॥७३॥

१. भुजालिंगनोच्छ्वा सितानां—वल्ल०, म० सिं०, सारो०, सु० वि०।
२. इन्दुपादैः का० बा० पा०, द्योतिताश्चन्द्रपादैः स० ती० वल्ल०।
३. प्रेरिताश्चन्द्रपादाः –वि० सारो०। जललवादेशिता० पाठा० व्याख्यानुसारम्।
४. संह० भा०।
५. तत्संरोधस्य मा०।
६. मेधाकाणस्य मा०।

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं-
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम्।
[1]सभ्रूभंगप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भ[2]श्चतुरवनिताविभ्रमैरेव सिद्धः ॥७४॥

यत्र पुरि **धनपतिसखं** कुबेरमित्रमत एव तत्प्रीत्या **साक्षात्** स्वमूर्त्या न तु प्रतिमारुपेण तिष्ठन्तं देवं शिवं ज्ञात्वा **भयाद्दे**हदाहत्रासेन कामश्चापं न [3]**वहति** इत्यु-त्प्रेक्षे। उत्प्रेक्षायां **प्रायः**। तथा च कुकामिमोहनशरसंधानसंकेति भावः। कीदृशम्-**षट्पदा** भ्रमरा एव ज्या [4]प्रत्यञ्चिका यत्र। तत्कामस्य पुष्पेषुतया मधुलोभाद्भ्रमर-सान्निध्यम्, तत्र च ज्यासाम्याद्भयकोटिपातेपि भृंगाणामिति भावः। तर्हि निर्व्यापारे कामे कथं तत्र शृंगार इत्यत माह—**तस्य** चापस्या**रम्भो**ऽर्थक्रिया मनोज्ञस्त्रीविलासैरेव सिद्धः। कीदृशै—भ्रूभंगवद्यथा सथा प्रहितनेत्रैः कामिन एव **लक्ष्या** वेध्यास्तेषु [अ] **मोघैः** सफलैः, उन्मादजनकैरिति यावत्। इह कामिनीविभ्रमेण कामिनो विलसन्त्यालं मम चापेनेति चापत्यागे हरभयहेतुतोत्प्रेक्ष्यते[5] न चैवं पुंसां कामः, समन्वितस्त्रीणान्तु नेति वाच्यम्, अन्यथा व्याख्यातम्। तथा हि कामः कामिलक्ष्येषु चापं[6] न वहति पुरुषेषु चापं न वहति स्त्रीषु तु वहत्येवेत्यर्थः। कामोऽपि पुमान्, पुरुषाश्च शिवमूर्त्तयः सर्वे इति पुनर्दाहमयात्तेषु चापं हरति। स्त्रीषु निर्भयं वहत्येवेति वार्थः। एतेन स्त्रीणां रम्यत्वमुक्तम् ॥७४॥

[7]तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं[8]-
दूराल्लक्ष्यं [9]सुरपतिधनुश्चारुणा तोरणेन।
यस्योद्याने[10] कृतकतनयः कान्तयावर्धितो[11] मे-
हस्तप्राप्यस्तवकविनतो बालमन्दारवृक्षः ॥७५॥

१. सभ्रूभंगं पाठा०।
२. चटुल० वि०।
३. हरति मा०।
४. पतञ्चिका मा०।
५. त्प्रेक्षते मा०।
६. पापं मा०।
७. अत्रा० वि०।
८. नुत्तरेण० पाठा०।
९. त्वदमरधनु० का० बा० पा०।
१०. उपान्ते पाठा०।
११. वर्धितः कान्तया मे का० बा० पा०।

तत्र पुरि मदीय**मागारं** गृहमस्ति। **धनपतिगृहादुत्तरेण** कुवेरगृहस्योत्तरदेशे। **प्रकृत्यादिभ्य उपसंख्यानमिति** सप्तम्यर्थे तृतीया। धनपतिगृहानुत्तरेणेति पाठे **एवमन्यतरस्यामदूरे पञ्चम्या** इत्यनेन प (?) **एनपा द्वितीयेति** द्वितीया। **गृहाः पुंसि च भूम्नेवेत्यमरः।** इन्द्रधनुषेव मनोज्ञेन **तोरणेन** वहिर्द्वारे दूरादेव लक्षणीयम्[1]। इन्द्रचापादपि मनोज्ञेन, विविधरत्नमयत्वात्। यद्वा चित्रानेकरत्नदीप्त्या[2] तोरणः शक्रचापाकारः स्फुरतीति तेन। अनेन वाह्यचिह्नमुक्त्वानन्तरमाह[3]—यस्य गृहस्योद्याने उपवने वालमन्दारवृक्षोऽस्ति। कीदृशः—मम **कान्तया वर्धितः** संवर्धितः जलसेकादिनेत्यर्थः। अत एव **कृतकतनयः** कृत्रिमपुत्रः तस्या ऐवेत्यर्थात्। अनेन तस्या अप्रसूतत्वं नूतनत्वञ्चोक्तम्। तथा चास्यामत्यन्तानुरागः सूचितः। **हस्तप्राप्येन** करलभ्येन **स्तवकेन** गुच्छेन **विनतो** नम्रः। अनेनोपचारातिशय उक्तः। देवतरुत्वेनाकालेऽपि पुष्पसंपत्तिरुक्ता। **भवनागारमन्दिरमित्यमरः। तोरणोऽस्त्री वहिर्द्वारमिति** च ॥७५॥

वापि चास्मिन्मरकतशिलाबद्धसोपानमार्गा-
[4]हैमैश्छन्ना [5]कमलमुकुलैः [6]स्निग्धवैदूर्यनालैः।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं-
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य[7] हंसाः ॥७६॥

अस्मिन्वने **वापी** गृहदीर्घिकास्ति कीदृशी—मरकतरूपशिलया **बद्धः सोपानमार्गो** यस्याः सा। पद्मकलिका[भिश्छ]न्ना व्याप्ता। कीदृशैः—**हैमैः** सौवर्णैः स्निग्धं [चिक्कणं] वैदूर्यं मणिभेदो नालं येषां तैः। एतेन सविशेषजलक्रीडोक्ता। **यस्या** वाप्या जले कृतावासा हंसा**स्त्वां** मेघं दृष्ट्वा सन्निहितमपि **मानसं** सरो **नाध्यास्यन्ति** न स्म[रि]ष्यति। कीदृशाः—**व्यपगताः शुचो** येषां ते त्यक्तमानसवियोगदुःखा इत्यर्थः। मेघदर्शनात् [कि]ल हंसा मांनसं यान्ति। ऐतेन ततोऽप्यस्य उत्कर्षरम्यत्वे उक्ते। अथ च यत्र स्थिता **हंसाः** परमहंसा योगिनो मेघं[8] दृष्ट्वा सन्निहितमपि मानसं न स्मरन्ति, इहैव स्वेष्टलाभात्। **हैमै**रित्यत्र विकारार्थे मयटा भाव्यमिति न वाच्यम्, **क्वचिदपवादविषयेऽप्युत्सर्गः प्रवर्तत** इति न्यायेन मयटं वाधित्वा **प्राणिरजतादिभ्योऽञ्** इत्यञ् प्रत्ययात्। विभूत्युत्कर्षकथनादुदात्तोऽयमलंकारः ॥७६॥

१. लक्ष्य० मा०।
२. यत्न मा०।
३. मुक्तान्तर० मा०।
४. स्फीता—का० बा० पा०, स्यूता—वल्ल० प्रभृ०।
५. विकचकमलैः कृ० पाठा०।
६. दीर्घ० का० बा० पा०।
७. प्राप्य—का० बा० पा०।
८. मेहं मा०।

[1]तस्यास्तीरे [2]रचितशिखरः पेशलैरिन्द्रनीलैः-
क्रीडाशैलः कनककदली[3]वेष्टनप्रेक्षणीयः।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण -
प्रेक्ष्योपान्तस्फुरित[4]तडितं त्वां तमेव स्मरामि ॥७७॥

तस्या वाप्यास्तटे **क्रीडाशैलो**ऽस्ति। क्रीडार्थं शैल इति **शाकपार्थिवादिः।** कीदृशः—**पेशलै** रम्यैः कोमलैर्वा इन्द्रनीलमणिभिः कृतशिखरः। सुवर्णकदलीवेष्टनेन सुन्दरश्च। हे सखे, मेघ, पर्यन्तोल्लसितविद्युतं **त्वां** दृष्ट्वा कातरेण विरहविकलेन मनसा **तं** क्रीडाशैलमेव स्मरामि मत्प्रियायाः प्रीतिविषयोऽयमिति हेतोः। तत्तुल्यस्य ते दर्शनादिनानीं कीदृशः सः, कथं वा पुरेव तत्र कान्तया सह क्रीडिष्यामीति [स्मरामी]ति भावः। यद्वा तुल्यदर्शनेन स एवागत इति चिन्तयामीति भावः। स्मरणे प्रियाप्रियत्वमेव हेतुः। क्रीडाशैलेन मेघस्य, [सु]वर्ण [कदल्या]स्तडिता[5] साम्यम्। **पेशल कोमले रम्ये** इति **विश्वः। गेहिनी गृहिणीत्यपीति** शब्दभेदः ॥७७॥

रक्ताशोकश्चलकिसलयः केसरस्तत्र[6] कान्तः-
प्रत्यासन्नः[7] कुरबकवृतेर्माधवीमण्डपस्य।
एकः सख्यास्तव सह मया वामपादाभिलाषी-
कांक्षत्यन्यो वदनमदिरादोहद[8]च्छद्मनाऽस्याः ॥७८॥

तत्र क्रीडाशैले **रक्त**[पुष्पप]ल्लवो**ऽशोक**वृक्षोऽस्ति। कीदृशः—[च] पलपल्लवः [प्रत्या]संगात् **केशरो** वकुलवृक्षोऽप्यस्ति। **कान्तो** रम्यः कुरबकेण रक्तवाणेन (?) वृत्तिर्वेष्टनं यत्र [तादृ]शस्य **माधवीमण्डपस्य** मण्डपाकारलताभेदस्य सन्निहितश्च। विशेषणत्रयमुभयत्र योज्यम्। तयोर्मध्ये एको रक्ताशोको अस्यास्तव सख्या मत्पत्न्या सह **वामपादाभिलाषी** वाम[पादप्रहा]रेच्छुः। अन्यः केसरो मया सहास्या आस्यमद्यं कांक्षति। **दोहदो** दोहव (?) इति व्याख्यातः। तस्य **छद्मना** व्याजेन उत्तरान्त्वयीदम् (?)। तरुणी वा[मपादप्रहारमुखमद्यगण्डूषसेका]भ्यामशोककेशरावकालेपि पुष्पादिकमुद्गिरतः।

१. यस्याः वल्ल० वि०।
२. विहित० मल्लि० वि० प्रभृ०।
३. वेष्टनः वि०, वेष्टित—सु० वि० मल्लि०।
४. स्फुटित का० बा० पा०।
५. तलिता मा०।
६. चात्र पाठा०।
७. प्रत्यासन्नौ पाठा०।
८. दौहृद० का० बा० पाठ०।

यदाह—अशोकश्चरणाघाताद्बकुलो वदनासव[ात्] तरुणीनाम·······यथाहं प्रणयकलहे तत्पदाघातमुखमद्याभिलाषी, तथा तावपि दोहदात्तु········इति व्याजपदनिर्वाहः। अत एव **मया सह**े[त्युक्तम्]। अत ए·······समाधिरलंकारः। **रक्तपदं** नीलाशोकव्यावृत्त्यर्थम् ॥७८॥

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
मूले बद्धा मणिभिरनतिप्रोढवंशप्रकाशैः।
तालैः [1]सिञ्जेद्वलयसुभगैर्नर्तितः कान्तया[2] मे-
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥७९॥

तयोर्वृक्षयोर्मध्ये **काञ्चनी** हैमी **वासयष्टिर्**मयूरादिवासस्तम्भश्चास्ति। कीदृशी—[स्फटिकस्य फलकं] स्तम्भारोप[णार्थं] चतुरस्रखण्डं यस्याः सा। **अनतिप्रौढो** बालो वंशस्तस्येव **प्रकाश** उद्योतो येषां तैर्मणिभिर्मरकतैर्मूले बद्धा। **यां** वासयष्टिं **नीलकण्ठो** मयूरो **अध्यास्ते** अधिवसति दि[वसा]न्ते। कीदृशः—**वो** युष्माकं मेघानां सुहृन्मित्रम्। अनेन तत्र मित्रदर्शनं ते स्यादित्युक्तम्। **तालैः** करतालैः मात्रादिभिर्वा करणैः मत्प्रियया **नर्त्तितः**। कीदृशैः—**शिञ्जितेन**[3] शब्दायमाने[न व]लयेन मनोज्ञैः। **काञ्चनी**त्यत्र **प्राणिरजत्वादञ्**। **ताले करतलेऽङ्गुष्ठतर्जन्यादियुते तले इत्यमरः**। सिञ्जेद्वलयेत्यादिना वाद्यमुक्तम्। सिञ्जेदित्यत्र परस्मैपदमात्मनेपदविधेरनित्यत्वादित्यवधेयम्। **नर्तित** इति भूतनिर्देशेन तत्काले वर्त्तनमुक्तमिदानीन्तु त्वमेव तं नर्तयितासीत्युक्तम्। **यामित्यत्राधिशीङ्स्थासां कर्मे**त्यधिकरण[स्य क]र्मत्वम्। रात्रिवासेन मयूरस्य दिने उत्सारणमाह अन्योऽपि करतलमिलद्ध्वनिः कांस्यतालादिना च नृत्यतीति ध्वनिः। नीलकण्ठः [शिवो]ऽपि संध्यायां नृत्यतीति ध्वनिरप्युन्मि[षति] ॥७९॥

एभिः साधो! हृदयनिहितैर्लक्षणै र्लक्षयेथाः[4]-
द्वारोपान्ते लिखितवपुषौ शंखपद्मौ च दृष्ट्वा।
[5]मन्दच्छायं भवनमधुना मद्वियोगेन नूनं-
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥८०॥

हे **साधो**, मेघ, **एभिः** पूर्वोक्तैश्चिह्नैर्मदीयं **भवनं** गृहं **लक्षयेथाः** ज्ञास्यसि। हृदि स्थितैः अनेन स्मरणयोग्यतोक्ता किं कृत्वा **शंखपद्मौ** निधी [द्वार]समीपे लिखितौ

१. शिञ्जावलय० पाठा०, सिञ्जद्वलय० का० वा० पा०।
२. कान्तया नर्तितो का० वा० पा०।
३. अस्पष्टम् सम्या०।
४. लक्षणीयं–काले।
५. क्षामच्छायं पाठा०।

दृष्ट्वा। यद्वा शंखपद्मौ [1]कम्बुकमले। ते च मंगलार्थं द्वारि लिख्येते। तौ दृष्ट्वा। कीदृशम्—इदानीं निश्चितं मद्वियोगेन **मन्दच्छायं** हीन[का]न्तिम्। अत्र हेतुमाह—यतः **सूर्यापाये** सूर्यापगमे सति **कमलं कर्तृ** [2]स्वीयां शोभां **न पुष्यति** न पुष्णाति। अन्योऽपि साधुः हृदिस्थितैर्लक्षणैः परार्थं लक्षयतीति ध्वनिः। लक्षिश्चुरादिः स्वरितेत्।

शंखपद्मौ निधी यत्र वपुषा लिखितौ गृहे।
हृष्टिः पुष्टिः करे नूनं भूतैस्तन्नाभिभूयते ॥ इत्यागमः।

छाया कान्तिरपि स्मृतेति विश्वः। शंखपद्मादयो निधेरित्यमरः। [अभिख्यानाम]शोभयोरिति च ॥८०॥

गत्वा सद्यः कलभतनुतां [3]तत्परित्राणहेतोः-
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः।
अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं-
खद्योतालीविलसितनिभां[4] विद्युदुन्मेषदृष्टिम् ॥८१॥

विद्युत्प्रकाश एव दृष्टिस्तामन्तर्भ[वनं गृहमध्ये] पतितां **कर्त्तुं त्वमर्हसि**। कीदृशीम्—**अल्पा अल्पा** अतिमन्दा **भा** दीप्तिर्यस्यास्ताम्। खद्योतानि ज्योतिरिंगण····स्य विलसितमुन्मेषस्तत्तुल्यामचिर[स्था]यित्वा[त्]। किं कृत्वा—तत्क्षणात् हस्तिबालकस्येव तनुर्यस्य। तनुत्वात्तनुः सूक्ष्मस्तद्भावं गत्वा। अत्र हेतुमाह—तस्या मत्प्रियायाः रक्षणनिमित्तम्। अन्यथा गजयूथाकृतिं दृष्ट्वा सा भीता सती म्रियेतापीति भावः। त्वं कीदृक्—प्रथमकथिते पूर्वोक्ते मणिमयतया मनोज्ञसानौ क्रीडाशैले स्थिरः तुल्यवर्णत्वेनालक्ष्यत्वा[र्थ]मिदम्। तस्यां वक्ष्यमाण लक्षणज्ञाना[र्थ]मन्तर्भवनेत्युक्तम्। अल्पेत्यनेनार्तिविद्युदुद्योता तस्या भीतिरपास्ता। खद्योतालीत्यनेन तत्र विद्युद्बुद्धिरपास्ता। **कलभः करिशवक** इत्यमरः। **खद्योतो ज्योतिरिंगण** इति च। **अन्तर्भवनमित्यव्ययी-**भावः ॥८१॥

तन्वी श्यामा [5]शिखरदशना पक्वबिम्बाधरोष्ठी[6]-
मध्ये [7]क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।

१. कम्बुकवने मा०।
२. स्वीयं मा०।
३. शीघ्रसंपात०–पाठा०।
४. विलसन, मो० काले०।
५. शिखरि० पाठा०।
६. धरौष्ठी मो० काले।
७. क्षीणा मो० काले।

श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां-
या तत्र [1]स्याद्युवतिविषये[2] सृष्टिराद्यैव [3]धातुः ॥८२॥

तां जानीयाः[4] परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
[5]गाढोत्कण्ठा गुरुषु दिवसेष्वेषु गच्छत्सु बालां-
जातां मन्ये शिशिरमथितां पद्मिनीं वाऽन्यरुपाम् ॥८३॥

तत्र गृहे एतादृशी **या स्याद्** भवेत्, तां मेद्वितीयं जीवितं **जानीयाः** ज्ञास्यसीत्युत्तरेण संबन्धाद्युग्मकम् । **जीवित**मित्यजहल्लिगतया क्लीबत्वम् । कीदृशी—**तन्वी** कृशांगी स्वभावाद्विरहेणातितरामिति भावः । यद्वा **तन्वी** कोमलांगी **श्यामा** अप्रसूता श्यामांगी वा । यदाह—

शीते या चोष्णगात्री स्यादुष्णे तु सुखशीतला ।
प्रकृत्या सुकुमारांगी सा श्यामेति प्रकीर्तिता ॥ इति परिभाषिता वा । **अप्रसूतांगनायाञ्च श्यामा श्यामलतापि चेति मेदिनिकर** । शिखरवद्रत्नविशेषवद्दन्ता यस्या सा । **पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुरिति शाश्वतः** । यद्वा शिखरं कुन्दकुड्मलं तद्वद्दन्ता । यद्वा शिखरं श्वेतरत्नं तद्वद्दन्ता । **श्वेतरत्नेऽपि शिखरं शिखरं कुन्दकुड्मल** इति **विश्वः** । पक्वबिम्बफलवदधरोष्ठौ यस्या सा । **नासिकोदरौष्ठजंघादन्तकर्णश्रृंगाच्चेति** ङीष् । मध्यदेशे **क्षामा** कृशा [6]क्षीणमध्येत्यर्थः । **चकिताया** भीताया हरिण्या इव प्रकृष्टे ईक्षणे नेत्रे यस्याः सा । **चकिते**त्यनेन त्रस्तमृगीविस्तारिनेत्रा सा स्यादिति तन्नेत्रविस्तार उक्तः । **निम्ना नाभिर्गम्भीरा** नाभिर्यस्याः सा । **श्रोणिभारान्नितम्बगौरवादलसगमना** मन्थरगतिः । **स्तनाभ्यां** स्तोककम्पनम्रा । प्रत्यंगगुणा वक्तुमशक्या इति सामान्यतस्तानाह—**युवतिविषये धातुः** प्रथमा सृष्टिरिव । स्वकौशलज्ञापनाय धात्रा सैव प्रथमं सृष्टेति भावः । कीदृशीम्—**परिमिता** अल्पा **कथा** यस्यास्तां मद्वृत्तचित्तया तस्याः कथैव न, यदि च सख्यनुरोधाद्वदति तदा अल्पमिति भावः । **मयि सहचरे** प्रिये दूरीभूते सति **एकाम**द्वितीयां[7] चक्रवाकस्त्रीमिव । यद्वा **एकाम**ेकपत्नीम् ।

१. आस्ते म० सि० ।
२. विषया का० वा० पा० ।
३. आधैव म० सि०, वल्ल०, वि० ।
४. जानीथाः का० वा० पा० ।
५. गाढोत्कण्ठां पाठा० । बाला जाता शिशिरभथिता पद्मिनी वान्यरुपा—का० वा० पा० ।
६. क्षीणामध्ये० मा० ।
७. मद्वितीयायां मा० ।

[1]रामशापाद्दूरीभूतस्य चक्रवाकस्य शापदूरीभवनेन साम्यम् । विरहदुःसहतया **गुरुषु एषु** दिनेषु **गच्छत्सु** सत्सु हृदोत्कण्ठाम् । **बालां** षोडाशाब्दवयस्काम् । **बाला स्यात्षोडशाब्दा [त]दुपरि तरुणी त्रिंशतं यावदूर्ध्वं, प्रौढा स्यात्पञ्चपञ्चाशततमवधितो** वृद्धतामेति नारीति **भरतः** । अधुना अन्यरूपां जातां **शशिमथितां** बालां पद्मिनीमिवाहं **मन्ये** । यद्वा यातां गतामन्यरुपाम् । तथा चान्यरुपत्वं गतामित्यर्थः । **वा** शब्द उपमानार्थः । **वा स्याद्विकल्पोमयोरिति विश्वः** । **वा** शब्दो वा [2]उपमायाम् । **वा शब्दउपमायां स्या**....**त्वनव्यय** इति धरणिः ॥८२–८३॥

नूनं तस्याः प्रवलरुदितोच्छूननेत्रं प्रियायाः[3]-
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
[4]हस्ते न्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं [5]त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥८४॥

नूनं निश्चितं **तस्या** मत्प्रियायाः मुखं कर्तृ चन्द्रस्य **दैन्यं** दीनत्वं, क्षीणत्वमिति यावत् बिभर्ति । कीदृशस्य—**त्वदनुसरणेन** मेघयोगेन **क्लिष्टा** हीना **कान्ति**र्यस्य तस्य । कीदृशम्—अतिरुदितेन उच्छूनमुच्छ्वसितं नेत्रं यत्र तत् । अन्तःसन्तापसमुत्पन्नया निःश्वासानामशिशिरतया उष्णत्वेन **भिन्नवर्णा**विन्याकृती अधरोष्ठौ यत्र तत् । हस्ते न्यस्तमारोपितं परिकर्माकरणेन लम्बालकतया **असकला** असंपूर्णा **व्यक्ति**रभिव्यक्तिर्यस्य तत् । मुखस्य चन्द्रेणालकस्य मेघेन साम्यम् । **वर्णो रूपयशोक्षर** इति **विश्वः** ॥८४॥

आलोके ते निपतति पुरा[6] सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु[7] वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां[8] सारिकां पञ्जरस्थां
कच्चिद्भर्त्तुः स्मरसि निभृते[9] त्वं हि तस्य प्रियेति ॥८५॥

चतुर्भिरादिकुलकम् । हे सौम्य, वहुगुण, **सा** प्रिया **त**वा**लोके** दर्शने सति **पुरा निपतति** निपतिष्यति । मूर्छिता पतिष्यतीत्यर्थः । यद्वा प्रणतिं करिष्यतीत्यर्थः ।

१. रामशापदूरीभूतस्य मा० ।
२. उपमानायां मा० ।
३. वहूनां का० वा० ता० ।
४. हस्तन्यस्तं पाठा० ।
५. त्वदुपगमन० स० ती० । त्वदुपसरण० वि० ।
६. पुरे वि० ।
७. विरहतनुमा मो० का० ।
८. वचनं का० वा० ता० ।
९. रसिके पाठा० ।

यावत्पुरानिपातयोर्लडिति भविष्यदर्थे लटि **निपततीति**। पूर्वं कलभतनुलतादिकमदर्शनार्थमुक्तमधुना तु तद्दर्शनमाहेति विरोध इति न वाच्यम्, तवालोके तेजसि विद्युद्रूपे सा निपतिष्यतीति व्याख्यानात्। प्रियावार्ताकथनकाले मेघदर्शनस्योचितत्वाच्च। कीदृशी—**वलिव्याकुला** वा मदागमनसूचक काकाद्युपहारपरा। देवपूजासक्ता वा। मत्सादृश्यं लिखन्ती वा। कीदृशम्—**विरहतनुतया**[1] **भावगम्यम**भिप्रायमनुमानगम्यं वा। **भावगम्यं** भाववेद्यं वा। यद्वा कीदृशी सा-विरहेण कृशता **तनुता** यस्यां सा। सादृश्यं कीदृशम्—भावगम्यमभिप्रायादिवेद्यम्। हे [2]**निभृते** हे निःशब्दे, विनीते वा यतस्त्वं तस्य **प्रिया** प्रेमपात्रमतः किं भर्त्तारं [3]स्मरसीति मनोज्ञवचनां पञ्जरस्थां च सारिकां पृच्छन्ती वा। **कच्चित्कामप्रवेदने इत्यमरः**। यद्वा निभृत एकान्ते त्वं तस्य प्रिया अतस्तं स्मरसीत्यर्थः। **निपतति पुर** इति पाठे **पुरो** अग्रे **तवालोके** निपतति सति सा एवं भवतीति योजना। **भर्त्तरित्यधीगर्थेत्या**दिना कर्मणि षष्ठी। वलिदानादिकं विरहे कर्त्तव्यम्। यदाह भरतः—

देवतापूजनं कुर्याद्द्याद्वलिभुजे वलिम्।
लिखेत्कान्तप्रकृतिं पाठयेच्छुकसारिकाम्॥
गणयेच्चावधिदिनं गीतं गायेत्तदंकितम्।
एवंविधैर्विनोदैस्ता रमणेन विना स्थिता॥

वलिः पूजोपहारयोरिति शाश्वतः ॥८५॥

उत्संगे वा मलिनवसने सौम्य निक्षिप्य वीणां-
मद्गोत्रांकं विरचितपदं गेयमुद्गातुकामा।
[4]तन्त्रीरार्द्राः नयनसलिलैः सारयित्वा कथंचित्-
भूयो भूयः [5]स्वयमपिकृतां मूर्छनां विस्मरन्ती ॥८६॥

मलिनवस्त्रे कोडे वीणां निःक्षिप्य **गेयं** गीतमुद्गातुकामा वा उच्चैर्गातुमिच्छन्ती वा। कीदृशम्—**मद्गोत्रेण** नाम्ना अंकितं **विरचितपदं** कृतध्रुवादिपदं **भूयोभूयो** बहुवारं स्वयमपिकृतां मूर्छनां रागभेदं विस्मरन्ती च। विरहविकलचित्ततयेति भावः। किं कृत्वा अश्रुभि**रार्द्राः** स्निग्धास्तन्त्रीः[6] कष्टसृष्ट्या **सारयित्वा** परिमृज्य। विरहादेव मलिनवस्त्रत्वम्। **निःक्षिप्येत्य**नेन हस्तधारणेऽप्यशक्तिरुक्ता।

१. तवतया मा०।
२. निवृत्ते मा०।
३. स्मरतीति मा०।
४. तन्त्रीमार्द्रां पाठा०।
५. स्वयमधिकृतां का० वा० पा०।
६. स्निग्धास्तान्त्रीः मा०।

तारो मूर्ध्नि गणे घोरो मन्द्रस्तु हृदये ध्वनिः।
उद्गीतं नाभिनादः स्यात् गायन्ती....गायनीः॥
स्वरः संमूर्छितो यत्र रागतां प्रतिपद्यते।
मूर्छनामिति तामाहुः कवयो ग्रामसंभवाम्॥

षड्जमध्यमगान्धाराः त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः। इति **भरतः** ॥८६॥

शेषान्मासान् [1]गमन दिवसस्थापितस्यावधेर्वा[2]-
विन्यस्यन्ती भुवि गणनया देहलीत्य[3]क्तपुष्पैः।
संयोगं[4] वा हृदयनिहितारम्भमासादयन्ती[5]-
प्रायेणैते रमणविरहेष्वंगनानां विनोदाः॥८७॥

कीदृशी—**गमनदिवसस्थापितस्य** यात्रादिन व्यवस्थापितस्या**वधेः** नियतकालस्यावशिष्टान् **मासान्** गृहद्वारि **त्यक्तपुष्पैः** करणै**र्गणनया** एकादिक्रमेण **भुवि विन्यस्यन्ती** वा लिखन्ती वा। प्राप्ते प्रिये एवं विहरिष्यामीति चित्तकृतोपक्रम**संयोगं** सुरत**मासादयन्ती** सन्निहितं वा कुर्वती। कथं परोक्षमिदं त्वया ज्ञातमत आह—बाहुल्येन कान्तविश्लेषेषु सत्सु स्त्रीणामेते विनोदाः कालक्षेपकव्यापारा भवन्ति। अतः परोक्षमपि जानीम इति भावः ॥८७॥

सव्यापारामहनि न तथा [6]पीडयेन्मद्वियोगः[7]-
शंके रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्संदेशः सुखयितुमलं पश्य साध्वीं निशीथे-
[8]तामुन्निद्रामवनिशयनासन्नवातायनस्थः ॥८८॥

पञ्चभिरादिकुलकम्। तव तां **सखीमहनि** दिने सव्यापारां वलिदानादिव्यापृतां **मद्वियोगस्तथा न पीडयेत्**, यथा रात्रौ पीडयेदित्यहं [9]**शंके**। कीदृशीम्— **गुरुतरशुचं** दुःसहशोकां **निर्विनोदां** वीणावादनादिहीनां च। **रात्रावि**त्युभयान्वयी। अतो **निशीथे**ऽर्धरात्रे तां सतीं पश्य। मत्संदेशैरत्यर्थं **सुखयितुं** प्रियवार्त्ताकथनेनेति भावः कीदृशीम्—

१. विरहदिवस० पाठा०।
२. प्रस्थितस्य पाठा०।
३. मुक्त० का० वा० पा०।
४. मत्संगं, संभोगं वि० सारो०, स० ती०, सु० वि० म० सि०।
५. आस्वादयन्ती पाठा०।
६. खेदयेत्।
७. विप्रयोगः पाठा०।
८. शयनां सौध०, सद्म० पाठा०।
९. संके मा०।

उन्निद्राम् निद्राहीनाम्। अनेन तदा संदेशश्रवणयोग्यतोक्ता। कीदृशः—भूमिशय्यानिकटगवाक्षस्थितः। **पीडयेदिति** प्रार्थनायां लिङ्। साध्वीत्यनेनार्धरात्रेऽपि तदालापः समन्वितः। **अर्धनिशीथे द्वावित्यमरः**। भूमिशयनं विरहात्। तन्निकटवासेनालापयोग्यतोक्ता। **अवनिशयनामिति** पाठे भूमिशयानां तां। त्वं कीदृशः—**सन्नं** निकटम् यद्वा सा[1] यत्र तत्रस्थ इत्यर्थः। **वातायनं गवाक्षः स्यादित्यमरः** ॥८८॥

आधिक्षामां विरहशयने [2]संनिकीर्णैकपार्श्वां-
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।
नीता रात्रिः [3]क्षणमिव मया सार्धमिच्छारतैर्या-
तामेवोष्णै[4]र्विरहमहतीमश्रुभिर्यापयन्तीम् ॥८९॥

कीदृशीम्—**आधिर्मनोव्यथा** तेन क्षीणां। **विरहशयनं** नलिनीदलादिशय्या भूमितलं वा। तत्र **पर्यस्तैकपार्श्वाम्**। अनेन परिवर्तनाशक्तिरुक्ता। **प्राचीमूले** पूर्वदिशि **एककलामात्रशेषां** चन्द्रमूर्त्तिमिव। अनेन कान्तिमत्त्वकृशत्वे उक्ते। दशमावस्थासान्निध्यमप्युक्तम्। या **रात्रिः क्षणमिव मया सार्धमिच्छासुरतैर्नीता**। बहुतरयोगेन महत्यपि रजनी मुहूर्त्तमिव प्रेरितेत्यर्थः। यद्वा **क्षणमिव** उत्सवमिव यथा तथा नीता। तामेव रात्रिं वियोगजैरत एवोष्णैर्नेत्रजलैर्**यापयन्तीमति** वाहयन्तीं दीर्घीकुर्वन्तीं वा। **पुंस्याधिर्मानसी व्यथेत्यमरः**। औज्ज्वल्यदौर्बल्याभ्यां प्राच्यविरहशय्यासाम्यम्। [5]**स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः**। क्षण उद्धव उत्सव इति च। व्याख्याने क्षणमित्यत्र क्लीबत्वम्, क्रियाविशेषणत्वात्। **लिंगमशिष्यं लोकाश्रयत्वादिति**न्यायेन पुंस्त्वस्य प्रायिक वात्। क्षणमित्यत्र क्लीबत्वमिति वा। **यापयन्तीमिति या प्रापणे** हेतुमण्णिचि रुपम् ॥८९॥

निश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं-
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बि[6]।
मत्संयोगः[7] [8]कथमुपनमेत्स्वप्नजोऽपीति निद्रा-
माकांक्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥९०॥

१. ता मा०।
२. संनिषण्णै० पाठा०।
३. क्षण इव पाठा०।
४. विरहजनितैः वि०, म० सि०, स० ती०, सारो०; विरहपतितैः सु० वि०, व०।
५. स्त्रियो मा०।
६. लम्बम् पाठा०।
७. संभोगः पाठा०।
८. सुखमुपनमेत् वल्ल० सारो०, सु० वि०; कथमपि भवेत् स० ती०; क्षणमपि भवेत् विल्स०।

कीदृशीम्—**नूनमुत्प्रेक्षे विश्वासेनालकं विक्षिपन्तीं** चालयन्तीम्। कीदृशेन—**अधर**पल्लवक्लेशकारिणा तस्योष्णत्वेन वैवर्ण्यकारित्वम्। कीदृशम्—**शुद्धस्नानात्** अभ्यंगं विना स्नानमात्रात् **परुषं** रूक्षं गण्डपर्यन्तलम्बितञ्च **स्वप्नजोऽपि** स मत्संयोगः कथमपि भवेदिति हेतोर्न्निद्रामिच्छन्तीम्। निद्रां कीदृशीम्—नेत्राम्बुपूराव**रुद्धावकाशां** रोदनेन निद्रापगम इति भावः। स्वप्नाज्जातः **स्वप्नजः पञ्चम्यामजाताविति** ॥९०॥

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा-
शापस्यान्ते विगलितशुचा या मयोन्मोचनीया[1]।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं-
गण्डाभोगात्कठिन[2]विषमामेकवेणीं करेण ॥९१॥

कीदृशीम्—**करेण** तामेकवेणीं **गण्डाभोगाद्** गण्डण्मडलाद्वहुवारं **सारयन्तीम्**। कीदृशीम्—**स्पर्शक्लिष्टाम्** अभ्यंगाद्यभावाद्रूक्षस्पर्शाम्। कठिनां च तां कर्मधारयः। अकोमलां विषमबद्धाञ्चेत्यर्थः। करेण कीदृशेन—**अयमितो** अमार्जितो नखो यत्र तेन। विरहवैराग्यादिदम्। **या** वेणी **आद्ये** विरहदिने **शिखा दाम** चूडामणिं शेखरं वा पुष्पमालां वा त्यक्त्वा। मयाबद्धा **शापस्यान्ते**[3] गतशोकेन **मया या** उन्मोचीया च। अयमितेत्य[त्र] यमेर्ण्यन्तान् क्तः। **यमोऽपरिवेषणे** इति वा क्तः ॥९१॥

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टान्-
पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव।
[4]चक्षुःखेदात्सलिल[5]गुरुभिः पक्ष्मभिश्छादयन्तीं-
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥९२॥

कीदृशीम्—अश्रुगुरुभिः **पक्ष्मभिर्**नेत्रलोमभिः कष्टेन चक्षु**श्छादयि**त्वा पिधाय **न सुप्तां** निद्राणां न वा जाग्रतीम्, तादृशाक्षिभ्यां जाग्रतीमपि वाह्यार्थाग्राहिणीमुद्विग्नामित्यर्थः[6]। चक्षुः कीदृक्—चन्द्रस्य किरणान् संमुखं **पूर्वप्रीत्या गतं तथैव** तत्क्षणादेव प्रतिनिवृत्तम्। कीदृशान्—अमृतशीतान्[7] गवाक्षवर्त्मगतांश्च। अमेघेऽह्नि दिने स्थल-

१. मयोद्वेष्टनी० वि० व०। तां मयोद्वेष्टनीयाम् पाठा०।
२. विषमात् व०।
३. शापश्चान्ते मा०।
४. खेदाच्चक्षुः का० बा० पा०।
५. सजल० मो० काले०।
६. उद्विग्ना इत्य० मा०।
७. अमृतच्छीतान् मा०।

पद्मिनीमिव ।[1] सापि किञ्चिद्विकाशान्न सुप्ता न वा बुद्धेत्यर्थः । इह विरहिण्याश्चन्द्र करनिरी[2]क्षणमसुखदतयेति भावः ॥९२॥

स्निग्धाः सख्यः कथमपि दिवा तां न मोक्ष्यन्ति तन्वी-
मेकप्रेक्षा[3] भवति हि जगत्यंगनानां प्रवृत्तिः ।
स त्वं रात्रौ जलद ! शयनासन्नवातायनस्थः-
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः ॥९३॥

हे मेघ ! स त्वं रात्रौ **शयनप्रत्यासन्नपरिजने** रक्षके सुप्ते सति **वीतनिद्रा**मपगत-निद्रां तां कान्ता**मुपेयाः** उपगच्छे । रात्रिगमने हेतुमाह—दिने **स्निग्धाः** स्नेहवत्यो वयस्याः मुहूर्त्तमति तां **न मोक्षन्ति** न [4]परित्यक्ष्यन्ति । अत्र हेतुमाह—यतः स्त्रीणां **प्रवृत्तिः** वार्त्ता संसारे **एकप्रेक्षा** एकजनावलोकिनी भवति । तथा च विरहिणी सा कथं स्ववार्त्तामनेकविदितां [5]करोत्विति ध्वनिः । **अयमपि श्लोकः प्रक्षिप्त** इति ॥९३॥

सा संन्यस्ताभरणमबला [6]पेलवं धारयन्ती
शय्योत्संगे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यस्त्रं [7]जलकणमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥९४॥

सा अबला जलकणमयमस्त्रं नेत्रजलमवश्यं त्वामपि **मोचयिष्यति** । न केवलं मामेवास्त्रं मोचयिष्यतीत्यपि पदस्यार्थः । मुंचि त्यागपूर्विकांगतिमाह । अतो **गतिबुद्धी-त्यादिना** द्विकर्मकता । कीदृशी त्यक्तालंकारं कोमलं बहुवारमतिकष्टेन शय्यामध्ये आरोपितं **गात्रं** शरीरं **धारयन्ती** । मामपि कथमस्त्रं मोचयिष्यतीति अत आह—**आर्द्रान्तरात्मा** स्निग्धचित्तः सर्व एव बाहुल्येन **करुणावृत्ति**र्दयालुर्भवति । मेघोऽपि जल-पूर्णत्वेनार्द्रान्तरात्मा भवतीति । अबलेत्युचितमलंकारधारणेऽप्यशक्तेः । **पेलवे**त्यनेन तापासहिष्णुतोक्ता । **असकृ**दित्यनेनान्तस्तापादेकत्रगात्रधारणाशक्तिरुक्ता । दुःखेति **प्रकारे** द्वित्वम् । यद्वा **आधिक्ये द्वे भवत** इति द्वित्वम् । **निहितमनस** इति पाठे **निहितं दत्तं मनो येन तत्**, सख्या दत्तचित्तमंगमित्यर्थः ॥९४॥

१. पद्मिमिव मा० ।
२. चन्द्रकारि० मा० ।
३. एकप्रख्या पाठा० ।
४. न मोक्षन्ति न परिस्यन्ति मा० ।
५. करोतीति मा० ।
६. कोमलं वि० म० सिं०, पेशलं पाठा० ।
७. जललवमयं वि० । जलकलमयं म० सिं० ।

तदवस्थां कथं जानामीत्यत आह—

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति-
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥९५॥

मद्विषये तव सख्याः स्निग्धं **मन** इत्यहं **जाने** । अतो हेतोः **प्रथमविरहे** पूर्वाननु-भूतवियोगे **इत्थं** पूर्वोक्तदशापन्नां **तामहं तर्कयामि** । **खलु** निश्चये । सुभगमात्मानं मन्यते **सुभगंमन्य**स्तस्य **भावः** सुभगोऽहमिति मतिर्मां **वाचालं** गर्हाबिहुभाषणं **न करोति**,[1] सत्यमेव वदामीत्यर्थः । यद्वा हे **सुभगंमन्य भावो**ऽनुरागो मां **वाचालं न खलु करोति**, नैव करोतीत्यर्थः । एवार्थे **खलु** । यद्वा न खलु शब्दोऽतिनिषेधे । **सुभगंमन्यु-भाव** इति पाठे **मन्युभावः** शोकाभिप्रायः, सुभगं मां वाचालं न करोतीत्यर्थः । कुतः—हे **भ्रातर्मया यदुक्तं** तत्सर्वमचिरादेव तव प्रत्यक्षं स्यादिति शेषः [2]**वाचालमित्याल-जाटचौ बहुभाषिणि** इत्यालच् ॥९५॥

रुद्धापांगप्रसरमलकैरञ्जनस्नेहशून्यं-
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि शंके मृगाक्ष्या-
[3]मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥९६॥

तस्या **मृगाक्ष्या नयनं** कर्त्तृ **त्वयि** मेघे[4] सन्निहिते सति मत्स्यचलनव्याकुल-पद्मशोभोपमा**मेष्यति** यास्यतीत्यहं **शंके** । कीदृशम्—शकुनवशा**दुपरिस्पन्दि** उर्ध्वस्फुरण-शीलम् । **अलकैः** रुद्धनेत्रान्तप्रसरणम्, कज्जलचैकट्यरहितं मदिरायाः परिहारात्त्यक्त-भ्रूविभ्रमञ्च । **प्रत्याख्यानं प्रत्यादेशनिराकृतिरित्यमरः । मधु मद्य इति शाश्वतः । स्यादुत्पलं कुवलयमित्यमरः** ॥९६॥

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं[5] त्याजितो दैवगत्या ।

१. केति मा० ।
२. वाचाटं मा० ।
३. कुल० वि० ।
४. मेघ मा० ।
५. चिरपरिचित वि० ।

संभोगान्ते मम समुचितो हस्तसंवाहनाभिः-
यास्यत्यूरुः [1]सरसकदलीस्तम्भगौरश्चलत्वम् ॥९७

अस्या वाम ऊरुश्चलत्वं सकम्पत्वं **यास्यति च**। इदमपि शुभसूचकम् । कीदृशः– **मदोयैः कररुहपदैः** नखक्षतैस्त्यज्यमानः । **मुक्ताजालं** किल शीतलत्वेनोरुप्रदेशे कामिन्या ध्रियते । तदपि बहुकालधृतं **दैवगत्या** विधिदशया **त्याजितः**। सुरतान्ते **मम हस्त-संवाहनाभिर्**हस्तमर्द्दनैः **समुचितो** योग्यः। संवाहनानामिति पाठे तेषां योग्य इत्यर्थः । स्निग्धरम्भास्तम्भवद् गौरौ धवलश्च विरहात्। यद्वा **गौरः** पीतः स्वभावात् । **स्यान्मर्द्दनं संवाहनमित्यमरः**। **पीतो गौरो हरिद्राभ** इति च ॥९७॥

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-
त्तत्रासीनः[2] स्तनितविमुखो याममात्रं सहेथाः[3] ।
मा भूदस्याः प्रणयिनि मयि[4] स्वप्नलब्धे कथंचित्-
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥९८॥

हे जलद, त्वद्गमनकाले **यदि सा** मत्प्रिया लब्धनिद्रासुखा भवेत् । शकुनदर्शनान्मत्संगमाशया सुहितत्वात्, तदा **तत्रासीन** उपविष्टः गर्जितविमुखः सन् **याममात्रं** प्रहरपर्यन्तं **सहेथाः** शमयेः । अत्र हेतुमाह—**मयि** वल्लभे **कथंचित्** स्वप्नप्राप्तेऽप्यस्यास्तत्क्षणाद्**गाढोपगूढं**। दृढालिंगनं, **कण्ठात् च्युतः** स्खलितो भुजलताग्रन्थिर्यत्र । तादृशं मा भूत् । त्वद्गर्जितश्रवणप्रबुद्धायाः [5]स्वप्नलब्धालिंगनच्युतिर्न स्यादित्यर्थः । **द्वौ यामप्रहरौ समावित्यमरः** ॥९८॥

[6]तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन-
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे-
वक्तुं [7]धीरस्तुलितवचनैर्मानिनीं प्रक्रमेथाः ॥९९॥

१. कनक० वि०, व० सरसकदलीगर्भ० का० वा० पा० ।
२. अन्वासीनः, अन्वास्यैनां पाठा० ।
३. सहस्व क्षमस्व पाठा० ।
४. जने का० वा० पा० ।
५. प्रश्नलब्धा० मा० ।
६. प्रोत्याप्यैनां का० वा० पा० ।
७. धीरस्तनित व०, वि० धीरः स्तनित० पाठा० ।

हे **धीर** ! कार्यपण्डित, **तां** मानिनी**मुत्थाप्य** गर्जितवचनेन **वक्तुं प्रक्रमेथाः**। **धीरे**त्यनेनोक्तिकुशलतोक्ता यद्वा धीरस्तुलितवचसा मधुरगर्जितवचनेन । कीदृशीम्— मेघजलकणशीतेन **मालतीनां** जातीनां अभिनवकलिकाभिः समं प्रत्याश्वस्तां [1]कृताश्वासाम् । मेघवातेनातपम्लानमालतीकोरकमप्युच्छ्वास्यते । तथा त्वत्सहितवातायने विद्युत्कम्पनिश्चलाक्षीम् । यद्वा हे विद्युतकम्प, इति मेघसम्बोधनम् । **सममि**ति सहार्थे अव्ययम्, तुल्यार्थं वा । क्रियाविशेषणं वा । जालकं क्लीबे कलिकेत्यर्थः । **त्वदि**त्यनेनान्यपुरुषागमनं ध्वनितम् । **प्रक्रमेथा** इत्यत्र **प्रोपाभ्यामिति** तङ् ॥९९॥

भर्त्तुर्मित्रं [2]प्रियमविधवे विद्धि मामम्बुवाहं-
[3]तत्संदेशान्मनसिनिहितादागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथिश्राम्यतां प्रोषितानाम्-
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥१००॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा-
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाष्य[4] चैव[5] ।
श्रोष्यत्यस्मात्परमवहिता[6] सोम्य ! सीमन्तिनीनां-
कान्तोदन्तः[7] सुहृदुपनतः संगमात्किञ्चिदूनः ॥१०१॥

युग्मकम् । हे **अविधवे**, जीवितपतिके ! **स्वभर्त्तुः** प्रियसुहृदं **मां** मेघं जानीहि । कीदृशम्—चित्तवृतात्तत्संदेशात् समीपमागतम् । यः पथि विश्रामं कुर्वतां पान्थानां **वृन्दानि** संघान् गर्जितैस्**त्वरयति**। स्वगृहं गन्तुमिति शेषः । कीदृशैः—**मन्दस्निग्धैः** गम्भीरहृद्यैः । कीदृशानि—विमुक्तनिजस्त्रीवेणीमोक्षणचलचित्तानि । **अविधव** इत्यनेन पतिजीवनाशया सन्देशश्रवणवाञ्छा सूचिता । **मनसी**त्यनेनात्रादर उक्तः । उत्तरार्धेन तस्याप्यागमनाय मया त्वरा कृतेत्युक्तम् । हे **सौम्य**, इति त्वया कथिते सति प्रिया त्वामेवं निरीक्ष्य **संभाष्य चास्मात्** परतः **परं** कृतावधाना सती श्रोष्यति । यद्वा त्वां वीक्ष्य **संभाष्य** च परमत्यर्थमवहिता सती **अस्मात्त्वत्त** एवं श्रोष्यति कीदृशम्—**उन्मुखी**

१. कृताश्वास्तां मा० ।
२. अभिदधे का० बा० पा० ।
३. तत्सदेशैर्हृदयनिहितैरा०, त्वत्संदेशान्मनसिनिहितादा० तत्संदेशाद्धृदयनिहितात् पाठा० ।
४. संभाव्य पाठा० ।
५. चैवं सारो० व० वि० ।
६. परमवहितं का० बा० पा० ।
७. कान्तोपान्तात्सुहृदुपगतः मल्लि०, वि० कान्तोपान्तात्पुहृदुपकृतः ।

उल्लसिताऽऽस्या, उत्कण्ठया जातोर्ध्वश्वासहृदया। **इत्याख्यातुमिति**[1] पाठे इत्याख्यातुं कथितुमुद्यतं [2]त्वां वीक्ष्येत्यर्थः। सीतेव यथा **पवनतनयं** हनूमन्तं वीक्ष्य सीता उर्ध्वमुखी उत्कण्ठितचित्ता च भूता तथेयमपीत्यर्थः। हे **अविधवे** सीते भर्त्तुः रामस्य प्रियमित्रं मां जानीहीति। कीदृशम्—**अम्बु** जलं वहतीति [3]कर्मण्यणि अम्बुवाहस्तं जलबहकरमित्यर्थः। एतेन स्वामिकार्याय निर्द्दशिता। [4]तत्संदेशचित्तवृत्त त्वत्समीपमागतञ्च। यो हनूमान् **प्रोषितानां** वनवासिनां **वृन्दानि** ध्वनिभिर्हेलिकारवैस्त्वरयति श्रमशून्यानि करोति। धातोरनेकार्थत्वात् वि माभावार्थः। **वनोपजीविनः शश्वत्प्रोषिताः स्युः परासिनः** इति **नीतिः**। **हनूमां-स्तूयमानस्तु**·······त्यागमः अवधाने [5]हेतुमाह—**कान्तोदन्तः** प्रियकल्याणवार्त्ता मित्रकथिता स्त्रीणां **संगमात्** सुरतात् किञ्चिदूनो भवति। **आख्यात** इति कर्त्तरि (?) क्तः। **वृत्तान्त उदन्तः स्यादित्यमरः**। मित्रकथनाद्वार्त्तायाः सत्यत्वम् ॥१००-१०१॥

तामायुष्मन्मम च वचनादात्मनश्चोपकर्त्तुं-
ब्रूया[6] एवं तव सहचरो रामगिर्याश्रमस्थः।
अव्यापन्नः कुशलमबले पृच्छति त्वां [7]वियुक्तां-
[8]पूर्वाशास्यं सुलभविपदां प्राणिनामेतदेव ॥१०२॥

त्रयोदशभिरादिकुलकम्। हे **आयुष्मन्**, चिरजीविन्। अनेनाशीःप्रदानेन संदेशनय[9] उक्तः। **तां सखीमुपकर्त्तुं ममात्मनः** वचनादेवं **ब्रूयाः** भणिष्यसि। हे **अबले**, तव प्रियो **अव्यापन्नो** जीवी **रामगिरि**तपोवनस्थस्त्वां **वियुक्तां** विरहिणीं **कुशलं पृच्छति**। अत्र हेतुमाह—यतः **प्राणिनां** क्षयिषु विनाशिषु करणेषु शरीरेष्वेतत् कुशलवचनं प्रथममाशंसनीयं भवति। जीवने सति संगमोऽपि स्यादिति भावः। **आश्वास्यमिति** पाठे प्रथमोऽयमाश्वास इत्यर्थः। **ऋहलोर्ण्यत्**। प्रच्छिर्द्विकर्मकः। **इहात्मन** इत्यनेन मद्दशास्वातन्त्र्येणापि ब्रूया इत्युक्तम्। रामगिरित्यनेन [10]व्रतित्वमन्यस्त्रीविमुखत्वञ्चाह।

---

१. इत्याख्यातमिति मा०।
२. त्वं मा०।
३. कर्म्मण्येति मा०।
४. चित्तवृत्ता मा०।
५. हे नास्ति।
६. ब्रूयादेवं का० वां० पा०।
७. वियुक्तः पाठा०, नियुक्तां का० बा० पा०।
८. पूर्वाभाष्यं पाठा०।
९. नयमुक्तम् मा०।
१०. व्रतीत्व मा०।

अबलेत्यनेन [1]विरहदुर्बलायाः जीवनेऽपि सन्देहात्, कुशलं पृच्छेत्युक्तम्। **पृच्छतीत्यनेनैव** जीवित्वप्राप्तौ भाविसंगमा[र्थ]मव्यापन्नपदम् ॥१०२॥

पुनस्तद्वाक्यमाह—

अंगेनांगं [2]सुतनु तनुना गाढतप्तेन तप्तं-
[3]सास्रेणास्रद्रवमविरतोत्कण्ठमुत्कण्ठितेन।
[4]दीर्घोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती-
[5]संकल्पैस्ते विशति विधिना वैरिणा रुद्धमार्गः ॥१०३॥

वैरिणा शत्रुभूतेन **विधिना** वारितागमनपथस्त्वत्पतिर्**दूरवर्ती तवांगं निजांगेन विशति**। **संकल्पै**र्मनोव्यापारैः त्वदंगसंगमंगेन प्राप्नोतीत्यर्थः कीदृशम्—[6]**सुतनु** अतिकृशम्। कीदृशेन—**तनुना** कृशेन। विरहादावयोरंगं सममिति विशेषणैराह—तप्तं संतप्तमतितप्तेन साश्रेण नेत्राम्बुमता। अश्रुणाप्लुतं व्याप्तम्। **अश्रुद्रुत** इति पाठे अश्रुणा द्रवीभूतमित्यर्थः। बहुवारमुच्छ्वसितं सोत्कण्ठेन दीर्घोल्लासमत्युल्लासिना। इह समदुःखतायामभिप्रायः। **संकल्पः कर्म मानसमित्यमरः** ॥१०३॥

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता-
त्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्।
सोऽतिक्रान्तः श्रवणविषयं [7]लोचनाभ्यामदृश्य-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥१०४॥

स त्वां [मन्] मुखेनेदं ब्रूते, **उत्कण्ठाविरचितपदं** यथा स्यात्। कीदृशः—**श्रवणविषयं** कर्णगोचरत्व[8] **मतिक्रान्तः** नेत्राभ्या**मदृश्यश्च**। स कः—**यः** सखीनामग्रे यदपि वस्तु **शब्दाख्येयं** शब्दबोध्यं तदपि तव मुखसंबन्धलोभात् **कर्णे कथयितुं लोलो**ऽभिलाषुकोऽभूत्। **किला**लीके निश्चये प्रसिद्धौ वा। कर्णे कथनस्यालीकत्वात्। **लोलश्चलसतृष्णयोरित्यमरः** ॥१०४॥

---

१. दुर्बलायां मा०।
२. प्रतनु पाठा०।
३. णाश्रुद्रुतम् पाठा०।
४. उष्णोच्छ्वासं सोष्णोच्छ्वासं पाठा०।
५. तैः पाठा०।
६. सुतनं मा०।
७. अदृष्टः पाठा०।
८. गोचरमिति मा०।

श्यामास्वंगं चकितहरिणीप्रेक्षणे[1] दृष्टिपातान्[2]-
[3]वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्-
[4]हन्तैकस्मिन्क्वचिदपि न ते चण्डि ! सादृश्यमस्ति ॥१०५॥

हे **चण्डि** ! कोपने, **हन्त** कष्टे, तव सादृश्य**मेकस्मिन्** वस्तुनि **क्वा**पि **नास्ति** । तथाहि—**श्यामासु** प्रियंगुषु श्यामलतासु तवांगम्, त्रस्तमृगीवीक्षणे दृष्टिपतनानि, चन्द्रे कपोलकान्तिम्, मयूरपिच्छभारेषु केशान्, श्लक्ष्णनदीकल्लोलेषु भ्रूविक्षेपान्, **उत्पश्यामि** तर्कयामीति सर्वत्रान्वयः । तथा चैकत्र त्वत्साम्यं नास्ति यद्दृष्ट्वा हृष्यामीति भावः । **प्रियंगुः श्यामलतयोः श्यामेति विश्वः** । **चण्डी**ति पूर्वमानकोपस्मरणम् **चण्डी कोपवती दुर्गेति विश्वः** ॥१०५॥

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले-
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
घर्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि ॥१०६

हे **बाले अस्य त्वन्मुखस्य दूरीभूत**मत एव **प्रतनु**मप्यतिकृशमपि **मां** कामः **क्षिणोति** हन्ति । कीदृशस्य—वृष्टि**सिक्तस्थल**वत्सुगन्धेः । **घर्मान्ते** वर्षासु मम दिनानि **कथं** गच्छेयुरिति **विगणय** चिन्तय । वाक्यार्थः कर्म । कीदृशानि—**दिक्संसक्ता** [दिग्लग्नाः[5]] । **प्रवितता** ये **घना** मेघास्तै**र्व्यस्ताः** अपसारिताः **सूर्यातपा** येषु तानि । एते सूर्यकरव्यस्तत्वकरमेघस्य मध्यस्थत्वकर्तृत्वमतीवेति कथं जीविष्य इत्युक्तम् । **दिगि**त्यनेन दिगंगनामंगि मेघदर्शनेन चित्तदुःखमित्युक्तम् । यद्वा **दिक्संसक्ताः** क्वचित् प्रविरलाः क्वचि**द्घना** निरन्तरा **व्यस्ता** इतस्ततो गामिनः **सूर्यातपा** येषु तानि । एतेनातपानामतिरम्यत्वं तदालोकनेन च [6]विरहमहत्त्वमुक्तम् । **क्षिणौतीति क्षिणु हिंसायाम्** । **संज्ञापूर्वविधेरनित्यत्वाद्**गुणाभावः ॥१०६॥

1. प्रेक्षिते का० वा० पा० ।
2. दृष्टिपातं पाठा० ।
3. वक्त्रच्छायं; गण्डच्छायं वि० ।
4. एकस्थं वि० ।
5. दिग्गग्नाः मा० ।
6. विरहत्व० मा० ।

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम् ।
अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे-
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥१०७॥

धातुरागैर्गैरिकादिरसैः शिलापट्टे प्रीतिक्रुद्धां त्वां लिखित्वा यावदात्मानं त्वत्पदपातिनं कर्त्तुमिच्छामि, **तावदेव** बहुवार**मुपचितै**रश्रुभि**र्मे दृष्टिरालुप्यते** अवरुध्यते । तेन चिकीर्षितं तल्लिखनमपि नास्तीति भावः । [1]लोहितं गैरिकरागलिखनम् । क्रुद्धापि [त्वं] रक्तैवेति भावः । अश्रूणामुपचयेनार्त्तिरुदितमुक्तम् । **तस्मिन्** चित्रेऽपि **क्रूर**श्चिरद्वेषी **कृतान्तो** यमो दैवं वा **नौ** आवयोः **संगमं** न सहते । कृतो अन्तो येनेति व्युत्पत्त्या रमणदशाऽप्राप्तिरुक्ता कृतान्तपदेन । **धातुर्मनः शिलाद्यद्रेरित्यमरः** । **कृतान्तो यमदैवयोरिति विश्वः** ॥१०७॥

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां-
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥१०८॥

खलु वाक्यभूषायां निश्चये वा । **मां पश्यन्तीनां स्थलीदेवतानां** वनदेवतानां वृक्षपल्लवेषु मौक्तिकस्थूला बाष्पकणा वारं वारं **न न पतन्ति** किन्तु करुणया पतन्त्येव । मां कीदृशम्—स्वप्नदर्शनेषु **कथमपि** प्राप्तायास्तव **निर्दया**लिंगननिमित्तमाकाशप्रसारितहस्तम् । एतेनात्मनः शोच्यदशा सूचिता ॥१०८॥

भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिंग्यन्ते गुणवति ! मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदंगमेभिस्तवेति ॥१०९

हे **गुणवति! ते** हिमाद्रि**वाताः** मया आलिंग्यन्ते । एभिर्वातैस्तवांगं यदि पूर्वस्पृष्टं भवेदिति संभावनया । अत एव संभावनायां **किल** । तथा च तद्द्वारापि त्वदालिंगनं स्यादिति भावः । **ये** वाता **देवदारु**वृक्षाणां **पल्लवपुटान् भित्त्वा** विकाश्य **सद्य**स्तद्दुग्धप्रवाहसुगन्धाः सन्तः **दक्षिणेन प्रवृत्ताः** दक्षिणदिशि वसन्ति स्म । पल्लवपुटभेदनेन

1. लौहित्यात्वं मा० ।

मन्दत्वम् तुषारेत्यादिना शैत्यञ्चोक्तम् । दक्षिणेनेति प्रकृत्यादित्वात्तृतीया । गुणवती-त्यनेनातिस्नेह उक्तः पूर्वं स्पृष्टं पूर्वस्पृष्टम् । सुप्सुपेति समासः ॥१०९॥

[1]संक्षिप्येत [2]क्षण इव कथं दीर्घयामा [3]त्रियामा-
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने ! दुर्लभप्रार्थनं मे-
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥११०॥

हे चटुलनयने मनोज्ञनेत्रे । अनेन त्वन्नेत्रदर्शनेनापि हृष्यामीत्युक्तम् त्रियामा रात्रिः क्षणवत्कथं संक्षिप्येत स्वल्पीक्रियेत, दीर्घप्रहरा यतः । अहर्दिनमपि पूर्वाह्लादि-दशासु कथं मन्दमन्दच्छायं स्यात् । इत्यनेन प्रकारेण दुःप्रापप्रार्थनं मम चित्तं दृढो-पतापाभिः त्वद्विरहवेदनाभिरशरणं नीरसं कृतम् । त्वत्संगमं विना निष्प्रतिक्रियं मन्मनो रात्रेर्दिनस्य च शीघ्रं गतिमिच्छतीत्याशयः । त्रियामा क्षणदा क्षपेत्यमरः । शरणं गृह-रक्षित्रोरिति च । मन्देति प्रकारे आधिक्ये वा द्वित्वम् ॥११०॥

न [4]त्वात्मानं बहु [5]विगणयन्नात्मनैवावलम्बे-
तत्कल्याणि त्वमपि [6]नितरां मा गमः कातरत्वम् ।
[7]कस्यात्यन्तं [8]सुखमुपनतं दुःखमेकान्ततो वा-
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥१११॥

हे कल्याणि, अवैधव्यचिह्नवति, कुलीने वा अहमात्मनात्मानं [न] पुनर्नावलम्बे किन्तु धैर्यं [9]करोम्येव । बहुपूर्ववृत्तं भावि च त्वत्संभोगादिकं विगणयन् भावयन् । यद्वा सुखदुःखयोरनित्यतादिविवेकेनात्मानं स्थिरीकरोमीत्यर्थः । तस्मात् त्वमपि[10] कातरत्वं भीतत्वं मा गमः न गमिष्यसि, धैर्यं कुर्वित्यर्थः । अत्र हेतुमाह—अत्यन्तं

१. संक्षिप्येव, संक्षिप्यैव, संक्षिप्यन्ते सारो०, स० ती०, सु० वि०, म० सि०, संक्षिप्येरन् व० ।
२. क्षणमिव का० वा० पा० ।
३. दीर्घयामास्त्रियामाः स० ती०, सारो०, व० सु० वि० । नन्वात्मानं पाठा० । इत्यात्मानं सारो० म० सिं०, सु० वि० ।
५. आत्मना नावलम्बे वि० ।
६. सुतरां वल्ल०, वि०, सु० वि०, सारो०, स० ती०, म० सिं० ।
७. कस्यैकान्तं का० बा० पा० ।
८. उपगतं वल्ल०, व०, सारो० ।
९. करोत्येव मा० ।
१०. त्वमप्यर्थं मा० ।

निरन्तरं कस्य सुखं दुःखं वा उपनतमेकान्ततो भवति । किन्तु तस्यापि इन्द्र-स्यापि तदुभयमस्थिरमेवेति भावः । यतो दशा अवस्था कदाचिन्नीचैरधोगच्छति कदाचिदुपरि उर्ध्वं गच्छति । चक्रनेमिक्रमेण यथा चलच्चक्रप्रान्तः कदाचिदधः कदा-चिदुपरि गच्छति तथा प्राणिदशापि सुखवती दुःखवती चेत्यर्थः । यद्वा दशा नीचैर्नीचं गच्छति उपरि उर्ध्वं गच्छतीत्यर्थः । यद्वा चक्रनेमिक्रमेणोपनतं सुखं दुःखं वा कस्या-त्यन्तमधो गच्छति उर्ध्वं वा किन्तुक्रमेणेत्यर्थः । अतो धैर्यं कुर्वित्याशयः । मा गम इति विधौ माङि लुङ् । तु पुनरर्थे । कल्याणीत्यनेन त्वन्मंगललक्षणैरेव जीविष्यामीत्युक्तम् । चक्रं रथांगं तस्यान्तो नेमिरित्यमरः ॥१११॥

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ-
[1]मासानेतान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां [2]विरहगणितं तं [3]तमात्माभिलाषं-
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥११२॥

हरौ [4]शेषशय्याया उत्थिते सति मम शापान्तः । अत [5]एतान् चतुरो मासान् गमय [गन्तुं] प्रेरय । लोचने निमील्य नेत्रे मुद्रयित्वा । हरिरपि नेत्रे निमील्य मासान् गमयतीति भावः । चतुरो मासान् लोचने [6]मीलयित्वेति च लोकोक्तिस्तदर्शकरणाल्लो-कोक्तिच्छायालंकारः । अतः 'आषाढस्य प्रथमदिवसे' 'चतुरो मासान्' इत्यनयोर-विरोधः । अपरसमाधानप्रकारास्तत्रैवानुसन्धेयाः । पश्चादनन्तरं तं तं विरहे बुद्धिस्थी-कृतमात्माभिलाषमावां निर्वेक्ष्यावः उपभोक्ष्यावहे । परिणतः प्रौढः शरच्चन्द्रो यासु तासु रात्रिषु । यद्वा परिणतः प्रसरणशील इत्यर्थः । शार्ङ्गं धनुः पाणौ यस्य स शार्ङ्ग-पाणिः कृष्णः । विशेषणद्वाराविशेषप्रतिपत्तिरिति न्यायेन ॥११२॥

संप्रत्ययभिज्ञानमाह—

भूयश्चासि[7] त्वमपि[8] शयने कण्ठलग्ना पुरा मे-
निद्रां गत्वा किमपि रुदती [9]सत्वरं विप्रबुद्धा ।

१. शेषान्मासान् पाठा०, मासानन्यान् का० बा० पा० ।
२. गुणितं पाठा० ।
३. तमेवाभिला० का० वा० पा० ।
४. शय्यां मा० ।
५. एवान् मा० ।
६. निमि० मा० ।
७. श्चापि वि०; श्चाह पाठा० ।
८. त्वमसि का० बा० पा० ।
९. सस्वरं । सस्वनं पाठा० ।

सान्तर्हासं कथितमसकृत्पृच्छतश्च[1] त्वया मे-
दृष्टः स्वप्ने कितव! रमयन्कामपि त्वं मयेति ॥११३॥

भूयोऽत्यर्थं **पुरा** पूर्वं शय्यायां मम **कन्ठलग्ना त्वमपि** स्थितासि। **च** अहमपि त्वत्कण्ठलग्न इत्यर्थः। यद्वा चकारापिशब्दौ भिन्नक्रमे। तेनापि [2]चेत्यर्थः। **भूयः** पुनरपि स तव भर्त्ता एवमाहेत्यर्थः। पूर्वं त्वं मम कण्ठलग्नासि **भूयः** पुनरपि निद्रां गत्वा ईर्ष्यया **किमपि** मन्दं क्रन्दती जागरितासि। यद्वा **किमपि** किमिदमिति कृत्वा क्रन्दतीत्यर्थः। बहुवारं क्रन्दननिदानं पृच्छतो मम कृते **सान्तर्हासं** यथा तथा त्वया इति कथितम्—हे **कितव,** धूर्त्त, **कामप्यन्यां** नारीं क्रीडयन् त्वं **स्वप्ने मया दृष्टो**ऽसि। स्वप्नासत्यगोपनायान्तर्हासः। यद्वा मानिनीत्वेन सपत्नीसभागमासहनादन्तर्हासः। **कितवे**त्युचितम् अन्यस्त्रीसंगमेन तद्वञ्चनात्। [[3]तदिदं] रहोवृत्त तयोरेवाध्यक्षमिति भवत्यभिज्ञानम्। **भूयो**ऽत्यर्थे पुनः पुनरिति **मेदिनिकरः** ॥११३॥

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा-
मा कौलीनादसितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहव्यापदस्ते[4] ह्यभोग्याः-
[5]दृष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥११४॥

हे **असितनयने,** श्यामनेत्रे, **एतस्मात्** पूर्वोक्तात् **अभिज्ञानदानादे**कान्तवृत्त-कथनात् **कुशलिनं** जीवितं **मां** निश्चित्य **कौलीनात्** कुलीनतया **मयि अविश्वासिनी मा भूः** मयि आशंकां मा कृथाः। कुलीना हि स्त्रियः चिरविरहितेऽपि कान्ते तज्जीवन-संदेहेन म्रियन्त इति भावः। यद्वा अन्यस्त्रीसानुरागित्वेन मय्यविश्वासं मा कार्षी-रित्यर्थः। अविश्वासहेतुमाह—अतिदुःखदतया किमप्यनिर्वचनीयं यथा तथा **स्नेहान-**नुरागान् **विरहव्यापदो** विपत्तेरुपादानं[6] कुर्वन्ति तज्ज्ञाः। यद्वा **स्नेहान्** किमपि कुत्सितरुपानाहुः। कीदृशान्—विरह एव व्यापदो येषां तान्। विरहे स्नेहलता विच्छिद्यत इति भावः। विरहे व्यापत्तौ हेतुमाह—यतः **ते** स्नेहा विरहे **सत्यभोग्या** अभुज्यमानाः सन्तः स्नेहविषये **वस्तुनि** वनितादौ दृष्टे उपलब्धे सति संवलितरसाः

१. पृच्छतोऽसि का० बा० पा०।
२. चित्यर्थः मा०।
३. तदिङ्ग मा०।
४. विरहे ह्यासिनस्तेऽप्यभोगा० का० बा० पा०। विरहध्वंसिनस्ते ह्यभोग्याः व०; विरहे ध्वंसिनस्ते ह्यभोगात् म० सिं०; स० ती०।
५. दिष्टे पाठा०।
६. विपत्तिरुपादाना मा०।

सन्तः **प्रेमराशीभवन्ति** प्रेमकूटतां यान्ति। य एवानुरागो दुःखदोऽधुना स एवाति-प्रीतिदः स्यादिति। प्रत्याशया कालो नेय इति भावः। **कौलन्तु कुलीनत्वे**····पक्षिणा-मिति **मेदिनिकरः**। अप्रेमराशिः प्रेमराशिर्भवति प्रमराशीभवति। **अभूत तद्भाव** इत्यादिना च्विः ॥११४॥

मन्मुखेनेदमाहेति यदुक्तं तन्निर्व्यूढमथ यक्षो मेघं प्रति प्रार्थनाभ्युपगममाह—

कच्चित्सौम्यः व्यवसितमिदं बन्धुकृत्यं त्वया मे
ऽप्रत्यादेशान्न[1] खलु भवतो धीरतां[2] कर्कयामि[3]।
निःशब्दोऽपि प्रदिशसि जलं [4]याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥११५॥

कश्चित् कामख्यापने हे **सौम्य,** सान्तमूर्त्ते **ममेदं बन्धुकृत्यं** मित्रप्रयोजनं **त्वया व्यवसितं** कर्त्तव्यतया[5] स्वीकृतम्। बन्धुपदेन प्रत्याख्यानानर्हतोक्ता। प्रतिवचना-भावान्न स्वीकृतमित्याशंक्याह—यतो **अप्रत्यादेशा**दनिराकरणादवचनाद्वा भवतो **धीरतां** धैर्यं **न तर्कयामि** न कल्पयामि वा, किन्तु विदधाम्येव। **नः** शिरश्चालने। न चार्थमति-सूचक शब्दाभावान्नार्थमतिरत आह—**चातकैर्याचितस्त्वं** निःशब्दोऽपि तेभ्यो जलं ददासि। अत्र हेतुमाह— यतः साधूनां वाञ्छितार्थसंपादनमेव प्रीतेषु **प्रत्युक्तं** प्रतिवचनं भवति। क्रियैव केवलमुत्तरं भवतीत्यर्थः। यद्वा **प्रणयिषु** याच्ञायोगिषु। **प्रणयः प्रेम्णि विश्वासे याच्ञाप्रश्रयोरपीति विश्वः।** उक्तमिति भावे क्तः ॥११५॥

एतत्कृत्वा प्रियसमुचितं[6] प्रार्थनाचेतसो[7] मे-
सौहार्द्राद्वा विधुर इति वा मय्यनुक्रोशबुद्धया।
इष्टान्देशान्विचर [8]जलद! प्रावृषा संभृतश्री-
र्माभूदेवं [9]क्षणमपि च ते[10] विद्युता विप्रयोगः ॥११६॥

१. प्रत्यादेष्टुं व०; स० ती०; प्रत्याख्यातुं सु० वि०; सारो; म० सिं०।
२. अधीरतां म० सिं०; सु० वि०।
३. कल्पयामि पाठा०।
४. याचितं पाठा०।
५. कर्त्तितया मा०।
६. प्रियमनुचितं का० वा० पा०।
७. प्रार्थनादात्मनः का० वा० पा०, वि०, प्रार्थनावर्त्मनः व० स० ती०, सारो०, सु० वि०।
८. जलद विचर पाठा०।
९. क्वचिदपि वि०।
१०. सखे का० वा० पा०, न ते वि०।

हे **जलद ! इष्टान् देशान् विचर** यथेष्टं गच्छेत्यर्थः। **ममैतत्प्रियसमुचितं** बन्धुकृत्यं **कृत्वा** कीदृशस्य–**प्रार्थनाचेतसो** याञ्चाचित्तस्य। प्रार्थनमिति पाठे मम चेतसः प्रार्थनं बन्धुयोग्यं कृत्वा विचरेत्यर्थः। **एतदिति** काव्योपसंहारे वा। प्रार्थनदाने निमित्तमाह—**सौहार्द्रात्** सुहृद्भावाद्वा **विधुरो** विकलोऽयमिति मपि बुद्ध्या वा, अनुकम्पनीयोऽयमिति ज्ञानपूर्विका कृपा अनुक्रोशस्तद् बुद्ध्या वा। सर्वत्र **मयीत्यनुषज्यते**। त्वं कीदृशः—**प्रावृषा** वर्षाभिः **संभृतश्रीरुपचितलक्ष्मीकः**। एवं **क्षणमपि** तव **विद्युता विप्रयोगो** विश्लेषश्च **मा भूत्** न भवतु। यथाऽहं प्रियारहितस्तया त्वं विद्युता विप्रयुक्तो मा भूः विद्युन्नायिकालिंगितः सुखेन विचरे त्याशयः। **कृपा दयाऽनुकम्पा स्यादनुक्रोश इत्यमरः। मा भूदित्यत्र न माङ्योग** इत्यटो निषेधः ॥११६॥

काव्यसागरे स्फुरन्ति नोद्भटा रसा (?)
मदीयबुद्धिरल्पिका कुवेदजनशेषतः।
लब्धो दुर्लभशासनं सुरगणग्रामोऽभिरामो गुणै-
र्विद्यावंशविभूषणैः स्वपिभुवेश्छत्रे उभे कारिते।
येनायं समभूद्द्विजातितिलकश्चण्डेश्वरः पण्डितो-
मीमांसैकरहस्यवश्यहृदये दातावदाताशयः॥

वेदेशं समसूत सोऽयममलं मीमांसया शोभितं
रामेशं सुतमाप सोऽपि गुणितं तन्त्रेऽनवद्योद्यमम्।
आपत्सोऽपि **गदाधरं** गुरुमते दीक्षासु शिक्षाक्षमं-
लेभे सोऽपि महामतिं गुरुमते **विद्याधरं** तं वरम्॥

रत्नधरं वरमैकसुपुत्रं शुद्धयशाः समसूत पवित्रम्।
सोऽपि **जगद्धर**माप गुणीशोऽगण्यगुणं गुणिनामिह गण्यम्॥

येनापाठि कठोरगौतममतं वैशेषिकं खण्डनं-
येनाश्रावि सकोषकाव्यनिवहं तत्पाणिनीयं मतम्।
छन्दोऽलंकरणं च भव्यभरतं येनाध्यगायि श्रुति-
स्तस्य **श्रीशजगद्धरस्य** कवितुष्टीकेयमुज्जृम्भताम्॥

नानाऽलंकृतिसुन्दरी रसवशा नाना गुणानां विधि-
र्नानाभावविभावतैकचतुरा नानार्थसार्थार्थिनी।
तत्तद्दूषणशून्यतोज्ज्वलतनू रम्यांगनेव स्थिरा-
टीकेयं परिशीलयन्तु कृतिनस्तेभ्यो नतिर्मामकी॥

इति श्रीमहो जगद्धरविरचिता **'रसदीपिनी'** मेघटीका समाप्ता।
शुभमस्तु। श्रीरस्तु।
शाके १६६३

व्याख्यातश्लोकानामकारादिक्रमेण सूची

सूत्रादीनि

उद्धृतकोषादीनां सूची

उद्धरण-सूची

उद्धरणानि		श्लोकांकाः
अ		
अः केशवे विषेधे च		२
अक्षो ज्ञानात्मशकटव्यवहारेषु	(मेदिनी)	१
अतको भ्रामके खिसे	(धरणिः)	३
अतत्त्वे तत्त्वरूपा	(भरतः)	५
अद्वयश्रेष्ठयोरेकम्	(शाश्वतः)	४८
अन्तः प्रान्ते स्वरूपेऽपि	(विश्वः)	२५
अप्रसूतांगनायां च श्यामा	(मेदिनी)	८२-८३
अमलाम्बरधारण०	(भरतः)	८
अवस्थां पञ्चमीं प्राप्ताः	(गजशिक्षा)	१४
आ		
आकारेणात्मनो भावम्	(?)	४२
आदर्शदर्शनं याने	(?)	१५
आदानं ग्रहणेऽपि स्यात्	(धरणिः)	६४
आनकः पटहो ढक्का	(अमरमाला)	३६
आलम्भपिञ्जविशर	(अमरः)	४७
आलोको दर्शनोद्योतौ	(?)	३, ३९
आवर्त्तोऽम्भसां भ्रमः	(अमरः)	३०
आशाबन्धः समाश्वासे	(विश्वः)	१०
इ		
इकार उच्यते कामः	(एकाक्षरकोषः)	१
इन्द्रद्रुः ककुभोऽर्जुनः	(अमरः)	२४
उ		
उक्तिपोषः क्वचिद्धेतोः	(?)	२
उत्तमा वरवर्णिनी	(अमरः)	६८
उत्तरा दिगुदीची स्यात्	(अमरः)	५९
उपमैव तिरोभूतभेदा	(दण्डी)	६८
ऊ		
ऊर्ध्वसंगे च मध्ये च	(विश्वः)	२९

उद्धरणानि		श्लोकांकाः
क		
कः प्रजापतिरुद्दिष्टः	(एकाक्षरः)	४३
कच्चित्कामप्रवेदने	(अमरः)	८५
कच्छपट्टगता लेखा	(शाश्वतः)	३९
कथावीजं च वक्तव्यं	(?)	१
कदम्बेनीपमस्त्रियाम्	(अमरः)	२२
कनकं हेम हाटकम्	(अमरः)	२
कन्दली तु लताभेदे	(धरणिः)	२२
कमला श्रीर्हरिप्रिया	(अमरः)	३३
करणं त्विन्द्रिये काये	(विश्वः)	५७
करीव सिक्तं पृषतैः	(रघुः)	२२
कलभः करिशावकः	(अमरः)	८१
कषायः सौरभे ख्यातः	(विश्वः)	३३
काञ्ची दामनिवेशने	(अमरः)	३६
कान्तार्थिनी तु या याति	(अमरः)	३९
कामरूपेऽपि कामः स्यात्	(विश्वः)	६४
कुलायो नीडमस्त्रियाम्	(अमरः)	२५
कुलिशं हीरके पवौ	(अमरः)	६३
कृतान्तो यमदैवयोः	(विश्वः)	१०७
कृपा दयाऽनुकम्पा स्यात्	(अमरः)	११६
कृष्णसारो मृगे श्यामताराया		४९
केकावाणी मयूरस्य	(अमरः)	२४
कौलन्तु कुलीनत्वे	(मेदिनिकरः)	११४
क्षण उद्धव उत्सवः	(अमरः)	८९
क्षारकं जालकं क्लीबे	(अमरः)	२८
क्षेपस्तु प्रेरणनिन्दयोः	(धरणिः)	४९
ख		
खण्डकाव्यमुखं कुर्यात्	(?)	१
खद्योतो ज्योतिरिंगणः	(अमरः)	८१
खमाकाशमुदाहृतम्	(विश्वः)	६०
ग		
गम्भीरास्तास्तु या नार्यः	(भरतः)	४२
गुरुर्महति पित्रादौ	(मेदिनी)	१
गृहं फलभेदेऽपि संवादी	(,,)	२५
गृहाः पुंसि च	(अमरः)	७५

उद्धरणानि		श्लोकांका:
पेशल: कोमले रम्ये	(विश्व:)	७७
प्रकोष्ठो मणिबन्ध: स्यात्	(मेदिनी)	२
प्रचुरेऽपि गते काले	(?)	२
प्रणय: प्रेम्णि विश्वासे	(विश्व:)	३, ११५
प्रतिभित्तिजलस्त्रावि	(शाश्वत:)	६३
प्रतिविम्बेऽपि कान्तौ च	(शाश्वत:)	६८
प्रतीहार्या वेत्रवती	(अमरमाला)	२६
प्रत्याख्यानं प्रत्यादेशनिराकृति:	(अमर:)	९६
प्रत्यूषोऽहर्मुखं कल्प	(अमर:)	३३
प्रसिद्धौ नाम चाव्ययम्	(विश्व:)	७
प्रस्थानं गमनं गम:	(अमर:)	२९, ४३
प्रासादेऽपि विमानं स्यात्	(विश्व:)	६५
प्रियंगुश्यामलतयो:	(विश्व:)	१०५
प्रोष्ठी तु शफरी द्वयो:	(अमर:)	४२
ब		
बाला स्यात्षोडशाब्दा	(भरत:)	८२-८३
बाष्पो नामाश्रुण: पूर्वावस्था	(?)	३
भ		
भवनागारमन्दिरम्	(अमर:)	७५
भिन्नौ दारितसंगतौ	(अमर:)	६१
भूति: स्याद्भस्मसंपत्त्यो:	(धरणि:)	२०
भूयोऽत्यर्थे पुन: पुन:	(मेदिनिकर:)	११३
म		
मञ्जर्यसमगर्भासौ	(?)	१
मधु मद्ये	(शाश्वत:)	९६
मध्याह्ना संस्थिते	(?)	१, ३
मातरिश्वा सदागति:	(अमर:)	७२
मालं देशेऽद्रिमालायाम्	(अमरमाला)	१६
मेखला खड्गबन्धे स्यात्	(विश्व:)	१२
य		
यथा स्वभावसंपन्ना	(?)	१६
यातुर्दक्षिणतो	(?)	१५
युद्धमायोधनं जन्यं प्रघन	(अमर:)	५०
येन संवत्सरो दृष्ट:	(?)	१
ये शिवायतनोत्सृष्टा	(हारावली)	३६

उद्धरणानि		श्लोकांका:
र		
रमणीयेषु देशेषु	(?)	७
रसोऽनुरागे पानीये	(विश्व:)	३०
रिक्तो निर्धनतुच्छयो:	(शाश्वत:)	२१
रेवतीरमणो राम:	(अमर:)	५१
रेवा तु नर्मदा	(अमर:)	२०
व		
विशाला त्विन्द्रवारुण्याम्	(मेदिनी)	३२
वृत्तान्त उदन्त: स्यात्	(अमर:)	१००-१०१
वृक्षा: पल्लविनोऽग्रत	(?)	१४
वृद्ध: प्रामाणिके जीर्णे	(मेदिनी)	३२
वेणव: कीचकास्ते स्यु:	(?)	५८
वेणी केशस्य बन्धने	(?)	१९
वेतसे नीरवञ्जला	(अमर:)	४३
[वेपथु]जायते देहे	(?)	२३
वेष्टने वरणे वृति:	(विश्व:)	२५
श		
शरजन्मा षडानन:	(अमर:)	४७
शरणं गृहरक्षित्रो:	(अमर:)	११०
शंखपद्मौ निधी यत्र	(आगम:)	८०
शिलीन्ध्रं कदलीपुष्पे	(मेदिनी)	११
शीते या चोष्णगात्री	(?)	८२-८३
शुद्धसूचिक	(आगम:)	४२
श्यामवर्णस्तु शृंगार:	(भरत:)	६०
श्वेतरत्नेऽपि शिखरं		८२-८३
र		
'''' रभूमौ मध्यदेशे च वेश्मन:	(विश्व:)	७२
रेवा तु नर्मदा	(अमर:)	२०
ल		
लीलां विदुष्केलिविलासहेला	(भरत:)	३७
लोलश्चलसतृष्णयो:	(अमर:)	१०४
व		
वनोपजीविन: शश्वत्	(नीति:)	१००-१०१
वप्र: केदारे वप्रप्राकाररोधसो:	(विश्व:)	२

उद्धरणानि		श्लोकांकाः
वर्णो रूपयशोऽक्षरे	(विश्वः)	५१, ८४
वर्षोपलस्तु करका	(अमरः)	५६
वलयः कटके सानौ	(विश्वः)	२
वलाका वकपंक्तौ स्यात्	(?)	९
वलिभुग्वायसा अपि	(अमरः)	२५
वलिः पूजोपहारयोः	(शाश्वतः)	२५, ५७, ८५
वलिश्चामरदण्डे स्यात्	(शाश्वतः)	३७
वल्मीकः सातपे मेवे	(?)	१५
वसतिः स्यादवस्थाने	(विश्वः)	१
वंशमात्रेऽपि कीचकः	(कोषः)	५८
वातायनं गवाक्षः स्यात्	(अमरः)	८८
वामः सव्ये मनोहरे	(विश्वः)	९
वामे मधुरवाक् पक्षी	(?)	९
वार्त्ता प्रवृत्तिवृत्तान्त	(अमरः)	४
वा शब्द उपमायां	(धरणिः)	८२-८३
वासवेश्मनि विवीर्ण	(?)	२०
वा स्याद्विकल्पोपमयोः	(विश्वः)	८२-८३
वाहुमूलं स्तनं नाभी	(?)	१९, ३०
विकाराः सहजा यत्र	(भरतः)	४२
विमर्दोत्थे परिमलो	(अमरः)	२७
श		
श्वेतो गौरो हरिद्राभः	(अमरः)	५४
स		
सद्यः प्रणयमुज्झन्ति	(?)	४१
सन् सुधीः कोविदो बुधः	(अमरः)	३२
समानवृत्त्या निर्व्यूढ	(?)	१
समानशीलव्यसनेषु सख्यं	(?)	१२
सरस्वतीदृषद्वत्योः	(स्मृतिः)	४०
सव्याजांशुकविक्षेप	(?)	१९
संकल्पः कर्म मानसम्	(अमरः)	१०३
सारंगश्चातके भृंगे	(विश्वः)	२२
सारंगसंकुलमहामालम्	(भट्टिः)	२२
सारो बले जले द्रव्ये	(मेदिनी)	२२
सितीव बलमेचके	(अमरः)	६१
सुरभिर्गवी च स्त्रियाम्	(अमरः)	४७

उद्धरणानि		श्लोकांकाः
सुरा हलिप्रिया हाला	(अमरः)	५१
सुशीतानि सुगन्धीनि	(?)	१
सूची तु सीवनद्रव्ये	(धरणिः)	२५
सौधोपरि कुटीं वलभीं	(शाश्वतः)	४०
स्कन्धस्तरुप्रकाण्डे च	(विश्वः)	५५
स्तनितं गर्जितं	(अमरः)	२३
स्त्रियां मूर्त्तिस्तनुस्तनूः	(अमरः)	८९
स्त्रियो योषिदबला	(अमरः)	२
स्थः प्रस्थः सानुरस्त्रियाम्	(अमरः)	२
स्नानीयेऽभिषवे स्नानम्	(विश्वः)	१, ३४-३५
स्यादुत्पलं कुवलयम्	(अमरः)	९६
स्यान्मर्द्दनं संवाहनम्	(अमरः)	९७
स्रोतः करिकरेऽपि च	(विश्वः)	४४
स्रोतोऽम्बुवेग इन्द्रिये	(विश्वः)	१३
ह		
हनूमांस्तूपमानस्तु	(आगमः)	१००-१०१
हर्म्यपृष्ठमुडुनाथरश्मयः	(?)	४०
हलं गोदारणश्च	(अमरः)	१६
हवनं भूतबलिं चापि	(स्मृतिः)	१७
हारीतपारावतसारसानां	(भरतः)	३३